॥ श्रीः ॥

हरिदास-संस्कृत-ग्रन्थमाला
२४०

॥ श्रीः ॥

# श्राद्धप्रयोगदीपिका

तीर्थविधि-देवर्षिपितृ-तर्पण-गोदान-गजदान-अश्वदान-भूमिदान-तिलपात्रदान-एकोद्दिष्टश्राद्ध-पार्वणश्राद्ध-अन्वष्टकाश्राद्ध-मासिकश्राद्ध-पितृसूक्त-मन्त्र-पाठैः समलङ्कृता

S
294.538
J 78 S

…स्कृत-सीरिज, बनारस-१

मूल्यं १।)

## अस्मत्प्रकाशित-धर्मशास्त्र-कर्मकाण्ड-ग्रन्थाः—

१ अन्त्यकर्मदीपकः । अशौचकालनिर्णय सहितः । प्रेतकर्म-प्रङ्गीभूत यतिकर्मनिरूपणात्मकः । नित्यानन्दपन्तपर्वतीयकृतः २॥)
२ अशौचनिर्णयः । म. म. वाचस्पति-रुद्रधरकृतः । भाषा टीका ॥)
३ आपस्तम्बगृह्यसूत्रम् । अनाकुला-तात्पर्यदर्शन-व्याख्याद्वययुतम् ७)
४ आपस्तम्बधर्मसूत्रम् । उज्ज्वलावृत्ति सहितम् ६)
५ कातीयेष्टिदीपकः । दर्शपौर्णमासपद्धतिः । नित्यानन्दपन्तपर्वतीयकृतः १॥)
६ कात्यायनश्रौतसूत्रम्-कर्कभाष्य सहितम् । सम्पूर्णम् १३)
७ कृत्यसारसमुच्चयः । गंगाधरमिश्रकृत टिप्पणी सहितः ४॥)
८ गोभिलगृह्यसूत्रम् । म. म. मुकुन्दशर्मकृत 'मृदुला' व्याख्यायुतम् ३॥)
९ तिथिनिर्णयः । भट्टोजिदीक्षितकृतः, नागोजिभट्टकृतश्च १॥)
१० निर्णयसिन्धुः । कृष्णभट्टकृत व्याख्या सहितः २२)
११ पारस्करगृह्यसूत्रम् । हरिहर-गदाधर-जयरामभाष्यत्रययुतम् ८)
१२ बोधायनधर्मसूत्रम् । श्रीगोविन्दस्वामिप्रणीतविवरणसमेतम् ७)
१३ याज्ञवल्क्यस्मृतिः । 'वीरमित्रोदय' 'मिताक्षरा' व्याख्या द्वयोपेता ८)
१४ याज्ञवल्क्यस्मृतिः । 'बालम्भट्टी' 'मिताक्षरा' टीका व्यवहाराध्यायः १६॥)
१५ लाट्यायनश्रौतसूत्रम् । अग्निष्टोमान्तम् । सटीकम् २॥)
१६ वर्षकृत्यदीपकः । म० म० श्रीनित्यानन्दपन्त पर्वतीयकृतः ७)
१७ वीरमित्रोदयः । म. म. श्री मित्रमिश्र कृतः १-१२ प्रकाशः ८५॥)
१८ श्राद्धकल्पलता । श्रीनन्दपण्डितकृता ४॥)
१९ श्राद्धपद्धतिः । म० म० वाचस्पतिमिश्रकृता परिशिष्ट सहिता १॥)
२० श्राद्धविवेकः । म. म. रुद्रधरकृतसटिप्पणः २)
२१ श्राद्धचन्द्रिका । भारद्वाज दिवाकर
२२ श्रौतसूत्रम् । कात्यायनप्रणीतं देव
२३ षडशीतिः । शुद्धिचन्द्रिका व्या
२४ संस्कारदीपकः-म० म० पण्डित
प्र० भाग ४) द्वि० भाग ५॥) तृ० भाग ५॥) १-३ भाग सम्पूर्ण १५)
२५ संस्कारगणपतिः । पारस्करगृह्यसूत्रस्यातिविस्तृतव्याख्यानस्वरूपा १५)
२६ स्मृतिसारोद्धारः । अत्युत्तमोऽयं धर्मशास्त्रग्रन्थः ६)

Library IIAS, Shimla
S 294.538 J 78 S
00006472

प्राप्तिस्थानम्—चौखम्बा संस्कृत पुस्तकालय, बनारस—१

॥ श्रीः ॥

हरिदास-संस्कृत-ग्रन्थमाला
२४०

॥ श्रीः ॥

# श्राद्धप्रयोगदीपिका

नैनीतालनिवासि—
जोशी श्रीजनार्दनशर्मसङ्गृहीता
सा च—
झोपाह्व श्रीरामचन्द्रशर्मणा संशोधिता।

चौखम्बा-संस्कृत-सीरिज, बनारस-१

सं० २०१० ] [ ई० १९५३

प्रकाशकः—
जयकृष्णदास हरिदास गुप्तः,
चौखम्बा-संस्कृत-सीरिज आफिस,
पो० बाक्स नं० ८, बनारस

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 6472
Date 15/10/65
SIMLA
28/12

पुनर्मुद्रणादिकाः सर्वेऽधिकाराः प्रकाशकाधीनाः ।

S
294.538
J 78 S

Library IIAS, Shimla
S 294.538 J 78 S
00006472

मुद्रकः—
विद्याविलास प्रेस,
बनारस-१

* श्रीगुरुः शरणम् *

# भूमिका

अथेदं 'श्राद्धप्रयोगदीपिका' नामकं नूतनग्रन्थरत्नं मुद्रापयित्वा श्रीमतां पुरस्तादुपस्थाप्यते। अस्मिन् ग्रन्थरत्ने हि श्राद्धप्रयोगं प्राधान्येन प्रतिपादयितुं समारब्धेऽपि तदङ्गभूतं तीर्थविधिं गङ्गापूजनम् इत्यपरनामकं ततो देवर्षिपितृतर्पणविधिं तीर्थप्राप्तिप्रसङ्गेनानुष्ठीयमानानि गोदान-गजदान-अश्वदान-भूमिदान-तिलपात्रदानानि च प्रतिपाद्य तत एकोद्दिष्ट-पार्वण-अन्वष्टका-मासिकश्राद्धानि प्रकृतिभूतानि प्रतिपादितानि मध्ये च पितृसूक्तं मन्त्रपाठश्चेति। अत्र खलु प्रतिपादितः प्रयोगविधिः कूर्माञ्चलीयपद्धत्यनुसारी नैनीतालनिवासिना जोशीत्युपनामकेन जनार्दनशर्मणा पण्डितप्रवरेण संगृहीतो वर्तते। अयं हि ग्रन्थो मुद्रायन्त्रालयस्थविद्वद्धरीणैः संपादितः संशोधितोऽपि तदीयाध्यक्षाग्रहेण मद्दृष्टिपथेऽप्यागत इति यथाशक्ति यथामति च शुद्धिं नीतोऽपि पर्वतीयजनसंग्राह्यतामपेक्षते इति तैरयमवश्यं संगृह्य प्रतिवर्षमनुष्ठीयमानानि श्राद्धान्यनया पद्धत्याऽनुष्ठाय ग्रन्थकर्तुः कृतकृत्यता संपादयिष्यते इति दृढं विश्वसिमि।

काशी, दीपावली
१६५३ ई०

भवतामनुचरः
श्रीनित्यानन्दोपासको
गोपालशास्त्री नेने

॥ श्रीः ॥

# श्राद्धप्रयोगदीपिका

## (१) अथ गङ्गापूजनम् ।

श्रीगणेशाय नमः । गङ्गां संप्रार्थ्य ताम्बूलं फलं द्रव्यं च समर्प्य दण्डवत् नमस्कृत्य पादौ प्रक्षाल्य प्रथमं प्रायश्चित्तसंकल्पं कुर्यात् । अद्ये-हेत्यादि० अमुकोऽहं तीर्थप्राप्त्यधिकारसिद्धये द्वादशाब्दं षडब्दं वा प्राजापत्याम्नायीभूतं सुवर्णं ब्राह्मणाय दास्ये इति सङ्कल्प्य दत्त्वा गङ्गा-मभिगम्य स्नात्वा मुण्डनसङ्कल्पं कुर्यात् । अद्येह० अमुकोऽहं पापच्छेदपू-र्वकनिखिलरोमसमसंख्याकवर्षसहस्रावधिस्वर्गमहित्वकामो गङ्गातीर्थप्रा-प्तिनिमित्तकं वपनं करिष्ये । इति संकल्प्य—

आत्मनःशुद्धिकामो वा पितॄणां मुक्तिहेतवे ।
वपनं कारयिष्यामि तीरेऽहं तव जाह्नवि ॥
यानि कानि च पापानि ब्रह्महत्यादिकानि च ।
केशानाश्रित्य तिष्ठन्ति तस्मात् केशान् वपाम्यहम् ॥
महापापोपपापाश्च केशलोमनखादिजाः
क्षुरादिच्छिन्नसर्वाङ्गैः ते मे दोषाः पतन्त्वधः ॥

इति पठित्वा जलमुत्सृजेत् । ततो मुण्डनं कृत्वा स्नानं कुर्यात् । प्रथमं क्षेत्रेशं नमस्कुर्यात् । तद्यथा—

नमो देवाधिदेवाय शितिकण्ठाय दण्डिने ।
रुद्राय चापहस्ताय चक्रिणे वेधसे नमः ॥

सरस्वती च सावित्री वेदमाता गरीयसी ।
सन्निधाने भवत्वत्र तीर्थे पापप्रणाशिनी ॥
सागरस्वननिर्घोष दण्डहस्तासुरान्तक ।
जगत्ससर्ज लीलायै नमामि त्वां सुरेश्वर ॥
तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यं ममाज्ञान्दातुमर्हसि ॥

इति प्रणम्य कुशतिलयवजलान्यादाय स्नानसङ्कल्पं कुर्यात् । ॐ विष्णुः ३ नमः परमात्मने श्रीपुराणपुरुषोत्तमाय स्वस्ति श्रीमत्समस्तजगदुत्पत्तिस्थितिप्रलयकारणस्य रक्षाशिक्षाविचक्षणस्य प्रणतपारिजातस्याच्युतानन्तवीर्यस्य श्रीभगवतो महापुरुषस्य श्रीमदादिनारायणस्याचिन्त्यया परिशक्त्या ध्रियमाणानामनेककोटिब्रह्माण्डानामेकतमे व्यक्ते महदहंकारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते ब्रह्माण्डखण्डयोर्मध्ये आधारशक्तिकूर्मानन्ताष्टदिग्गजोपरि प्रतिष्ठिते सप्तपातालस्योपरिभागे सत्यादिलोकषट्कस्याधोभागे महाकालशेषस्य सहस्रफणामण्डिते दिग्दन्तिदण्डशुण्डादण्डोद्दण्डिते लोकालोकाचलायिते लवणेक्षुसुरासर्पिर्दधिदुग्धजलोदार्णवपरिवृते जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करसप्तद्वीपद्वीपिते कांस्यताम्ररजतसुवर्णनागसौम्यगन्धर्वचारणभारतनवखण्डखण्डिते भारते वर्षे भरतखण्डे अयोध्यामथुरामायाकाशीकाञ्चीअवन्तिकाद्वारावतीकुरुक्षेत्रपुष्करादिनानातीर्थयुक्तकर्मभूमौ मध्यरेखायाः पूर्वदिग्भागे भागीरथ्याः तीरे सकलजगत्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्द्धस्य प्रथमवर्षे प्रथममासे प्रथमपक्षे द्वितीययामे तृतीयमुहूर्ते प्रथमघटिकायां सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगस्य प्रथमचरणे बौद्धावतारे षष्टयब्दानां मध्ये अमुकनामसंवत्सरे

अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकराशि-स्थिते रवौ चन्द्रे भौमे बुधे गुरौ शुक्रे शनौ राहौ केतौ अमुकगोत्रः अमुकराशिः अमुकशर्मा (वर्मा, गुप्तः, दासः इति यथायोग्यं योज्यम्) अहं मम इह जन्मनि जन्मान्तरे वा सञ्चितानां पातकानां ब्रह्महनन-मद्यपानस्वर्णस्तेयगुरुतल्पगमनतत्संसर्गरूपमहापातकानां बुद्धिपूर्वकं मनो-वाक्कायकर्मकृतानां बहुकालाभ्यस्तानामुपपातकानां च स्पृष्टास्पृष्टसंकरी-करणपात्रीकरणजातिभ्रंशकरणरसविक्रयकन्याविक्रयखरोष्ट्रमहिषाश्वाजा-दिपशुविक्रयव्रात्यब्राह्मणत्वदुर्ब्राह्मणत्वनिरर्थकब्रह्मच्छेदनऋणानपाकरणब्र-ह्मस्वदेवस्वराजस्वापहरणब्राह्मणनिन्दागुरुनिन्दाऽभक्ष्यभक्षणाऽचोष्यचोष-णाऽभोज्यभोजन—अपेयपानास्पृश्यस्पर्शन—अश्राव्यश्रवण-अनाघ्रेयघ्राण—अहिंस्यहिंसन—अवन्द्यवन्दन—अचिन्त्यचिन्तन—अयाज्ययाजन—अपूज्य-पूजनव्यतिक्रमणमातृपितृगुरुतिरस्कारधिक्करणस्त्रीपुरुषप्रीतिभेदनब्राह्म-णीगमनक्षत्रियस्त्रीवैश्यस्त्रीशूद्राविधवागमनवेश्याचाण्डाल्यादिहीनजातिस्त्री-गमनपशुयोनिगमनायोनिबीजवपनकूटसाक्षित्ववादपरापवादपरद्रोहपर-हानिकरणचौर्यकरणम्लेच्छसंभाषणम्लेच्छसहासनब्रह्मद्वेषगुरुद्वेषस्वामिभे-दमित्रवञ्चनभार्यानिन्दनगर्भपातनरजस्वलामुखास्वादननिषिद्धकालमैथुन-करणकामपरस्त्रीगमनस्पर्शनविकारभाषणपथिताम्बूलचर्वण—अनृतभाषण-हीनसेवनपरान्नभोजन—असाक्षिभोजनगणान्नभोजनभ्रूणहिंसाबालकहिं-सागवादिपशुहिंसास्नानत्याग—अतिथित्यागक्रमुकपत्रभोजनपङ्क्तिभेदकर-णस्त्रीसहभोजन—उच्छिष्टभोजनशेषभोजनादीनां पातकानां लघुस्थूलसू-क्ष्म—आर्द्राणां क्षालनपूर्वकं राहुकेतूपरागनिमित्तं कुरुक्षेत्रे श्रोत्रियसम्पा-दनकसहस्रसुवर्णभारदानजन्यफलदशगुणविन्ध्यसङ्गमकाश्युत्तरवाहगङ्गा-स्नानफलसहस्रगुणकामः श्रीगङ्गायाममुकतीर्थे वा सचैलं मज्जनपूर्वकं

गङ्गास्नानमहं करिष्ये इति सङ्कल्प्य श्रीगङ्गां ध्यात्वा निमज्योन्मज्य आचम्य प्रार्थयेत् । तद्यथा—

महापापोपपापानि नानायोनिकृतानि वै ।
बालभावेऽपि यत्पापं परद्रोहादिकं मया ॥
देहादिमानसं पापं सर्वदा यन्मया कृतम् ।
शुष्कमार्द्रं च यत्पापं जानताजानताकृतम् ॥
भूतं भव्यं भविष्यं च यत्पापं च मया कृतम् ।
मनसा कर्मणा वाचा यत्पापं च मया कृतम् ।
तस्मादशेषपापौघात् त्राहि जाह्नवि सर्वदा ॥
गतं पापं गतं दुःखं गतं मे व्याधिबन्धनम् ।
निष्पापोऽस्म्यधुना देवि प्रसादात्तव नान्यथा ॥

इति सम्प्रार्थ्य जले देवपितृमनुष्यतर्पणं कृत्वा आचम्य उत्तीर्य धौतवाससी परिधाय सतिलकः सन्ध्यादि नित्यकर्म विधाय ततः श्रीगङ्गां पूजयेत् । अर्घ्यं संस्थाप्य प्राणानायम्य पूजासङ्कल्पं कुर्यात् । ॐ विष्णुर्विष्णुर्विष्णुः नमः परमात्मने श्रीपुराणपुरुषोत्तमाय अद्येहेत्यादि अमुकराशिः अमुकशर्माऽहं श्रुतिस्मृतिपुराणोक्तफलावाप्तये सकलपापक्षयपूर्वकं श्रीगङ्गाप्रीतये श्रीगङ्गादेव्याः पूजनं करिष्ये, इति सङ्कल्प्य ध्यायेत्—

चतुर्भुजां त्रिनेत्रां च सर्वावयवशोभिताम् ।
रत्नकुम्भसिताम्भोजवरदाभयवत्कराम् ॥
सितवस्त्रपरीधानां मुक्तामणिविभूषिताम् ।
एवं ध्यायेत्सुसौम्यां च चन्द्रायुतसमप्रभाम् ॥
चामरैर्वीज्यमानां च श्वेतच्छत्रोपशोभिताम् ।
सुप्रसन्नां च वरदां करुणार्द्रां निरन्तराम् ॥

सुधापावितभूपृष्ठां दिव्यगन्धानुलेपनाम् ।
त्रैलोक्यनमितां गङ्गां सर्वदेवैरभिष्टुताम् ॥
दिव्यरत्नविभूषां च दिव्यमाल्यानुलेपनाम् ।
ध्यात्वा जले यथा प्रोक्तां तथा चार्यो प्रपूजयेत् ॥

इति ध्यात्वा ॐ नमो गङ्गादेव्यै इति नाममन्त्रेण आवाहनं ॐ समख्ये देव्याधियासन्दक्षिणायो रुचक्षसा मामऽआयुः प्रमोषीर्मोऽ-अहं तवव्वीरं विधेयं तव देवि सन्दशि । इति मन्त्रेण पाद्यं समर्प्य—

ॐ अम्बे अम्बिकेऽम्बालिके न मानयति कश्चन ।
ससस्त्याश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥

इति अर्घ्यम्, आचमनं समर्प्य वस्त्रादिकं समर्पयेत् । तद्यथा—

सर्वभूषाधिके सौम्ये लोकलज्जानिवारके ।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥

इति वस्त्रं, तदङ्गमाचमनीयं गन्धं च समर्प्य—

ॐ अक्षन्नमीमदन्त ह्यवप्रियाऽ-
अधूषतअस्तोषतस्वभानवो विप्रान
विष्ठयामती योजान्विन्द्रते हरी ॥

इति मन्त्रेण अक्षतान्समर्प्य करवीरादीनि पुष्पाणि समर्पयेत्—

करवीरादिपुष्पाणि देशकालोद्भवानि च ।
मयाऽऽहृतानि पूजार्थं गङ्गे पुष्पाणि गृह्यताम् ॥ इति ।

ततः धूपं—

दशाङ्गं गुग्गुलं धूपं सुगन्धं सुमनोहरम् ।
रुद्ररूपे नमस्तेऽस्तु गृहाण वरदा भव ॥ इति ।

ततो दीपं—

गृहाण मङ्गलं दीपं घृतवर्त्तिसमन्वितम् ।

मया निवेदितं भक्त्या गङ्गे तुभ्यं नमो नमः ।। इति ।

ततो नैवेद्यं—

सत्पात्रसिद्धं सुहविर्विविधानन्तलक्षणम् ।

निवेदयामि गङ्गायै सानुगायै गृहाण तत् ।। इति ।

ततो नैवेद्याङ्गमाचमनीयं क्षणं ध्यात्वा जपं विधाय समर्प्य ताम्बूलं समर्प्य द्वादशनामभिः पुष्पाद्यैः गङ्गां पूजयेत । १. ॐ भगवत्यै नमः २. ॐ नारायण्यै० ३. ॐ दशपापहरायै० ४. ॐ गङ्गायै० ५. ॐ विश्वमुखायै० ६. ॐ बृहत्यै० ७. ॐ अमृतायै० ८. ॐ दक्षायै० ९. ॐ शिवायै० १०. ॐ रेवत्यै० ११. ॐ नन्दायै० १२. ॐ तारायै नमः । इति सम्पूज्य ॐ गङ्गायै नमः इति नाममन्त्रेण नीराज्य पुष्पाञ्जलिं गृहीत्वा प्रार्थयेत्—

परदारपरद्रव्यपरद्रोहपराङ्मुखः ।

गङ्गा ब्रूते कदागत्य मामयं पावयिष्यति ।।

सुरधुनि मुनिकन्ये तारयेत्पुण्यवन्तं

स तरति निजपुण्यैस्तत्र किं ते महत्त्वम् ।

यदि च गतिविहीनं तारयेत पापिनं मां

तदिह तव महत्त्वं तन्महत्त्वं महत्त्वम् ।।

या चिद्रूपाऽपि प्रकटजलरूपा भगवती

यदीयाऽम्भोबिन्दुर्वितरति तु शम्भोरपि पदम् ।

पुनाना धुन्वाना सकलमपि नानाविधमियं

जगत्कृत्स्नं पायादनुदिनमपायात्सुरधुनी ।।

इति सम्प्रार्थ्य प्रदक्षिणं नमस्कारं च कृत्वा दक्षिणां दद्यात् ।

गङ्गाया अर्घदानमन्त्रः—

ब्रह्मपात्रसमुद्भूते गङ्गे त्रिपथगामिनि ।
त्रैलोक्यवन्दिते देवि गृहाणार्घ्यं नमोस्तु ते ॥
इति अर्घं दद्यात् । ॐ गङ्गादेव्यै नमः ॥
इति गङ्गापूजनम् ॥

## ( २ ) अथ तर्पणप्रयोगः ।

श्वेतपुष्पं गृहीत्वा—

ॐ यं ब्रह्म वेदान्तविदो वदन्ति
परं प्रधानं पुरुषं तथाऽन्ये ।
विश्वोद्गतेः कारणमीश्वरं वा
तस्मै नमो विघ्नविनाशनाय ॥
अभीप्सितार्थसिद्ध्यर्थं पूज्यते त्रिदशैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

इति गणेशं नमस्कृत्य पुष्पाञ्जलिं दत्त्वा सङ्कल्पं कुर्यात्, कुशजलयवान्यादाय ॐ विष्णुः ३ नमः परमात्मने श्रीपुराणपुरुषोत्तमाय अत्र पृथिव्यां जम्बूद्वीपे भरतखण्डे आर्यावर्ते पुण्यक्षेत्रे भारतवर्षैकदेशे ( हिमवत्पर्वतैकदेशे कूर्माचले ) ब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कृतत्रेताद्वापरान्ते कलियुगस्य प्रथमचरणे षष्ट्यब्दानां मध्ये अमुकनामसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकगोत्रोत्पन्नः अमुकराशिः अमुकशर्मा ( वर्मा गुप्तः दासः ) अहं [ अपसव्यं यज्ञोपवीतं कृत्वा ] अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणो वसुस्वरूपस्य [ अमुक-

गोत्राया: अस्मन्मातुः अमुकीदेव्याः वसुस्वरूपायाः ] ममोपात्तदुरितक्षयाय देवर्षिमनुष्यपितॄणां स्वपितॄणां च अक्षय्यतृप्तिकामोऽमुकतीर्थोदकेन तर्पणमहं करिष्ये इति सङ्कल्प्य कुशेन जलमभिलोडयेत्, ॐ विश्वे देवा स ऽ आगत शृणुताम ऽ इमꣳ हवम् एदं बर्हिर्निषीदत। ॐ विश्वेदेवाः शृणुते म ꣳ हवं मे ये ऽ अन्तरिक्षे य ऽउपद्यविष्ठ ये ऽ अग्निजिह्वा ऽ उत वा यजत्रा ऽ आसद्यास्मिन्बर्हिषि मादयद्ध्वम्, इत्यभिलोड्य ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इहागच्छन्तु इह तिष्ठन्तु गृह्णन्तु एताञ्जलाञ्जलीन्, इत्यावाह्य प्राङ्मुखो देवतीर्थेन कुशोपग्रहपाणिः यवमिश्रजलेन तर्पणं कुर्यात्, ॐ ब्रह्मा तृप्यताम् ॐ विष्णुः तृप्यताम् ॐ रुद्रः तृप्यताम् ॐ प्रजापतिः तृप्यताम् ॐ देवाः तृप्यन्ताम् ॐ छन्दांसि तृप्यन्ताम् ॐ वेदाः तृप्यन्ताम् ॐ ऋषयः तृप्यन्ताम् ॐ पुराणाचार्याः तृप्यन्ताम् ॐ गन्धर्वाः तृप्यन्ताम् ॐ इतराचार्याः तृप्यन्ताम् ॐ संवत्सरः सावयवाः तृप्यन्ताम् ॐ देव्यः तृप्यन्ताम् ॐ अप्सरसः तृप्यन्ताम् ॐ देवानुगाः तृप्यन्ताम् ॐ नागाः तृप्यन्ताम् ॐ सागराः तृप्यन्ताम् ॐ पर्वताः तृप्यन्ताम् ॐ सरितः तृप्यन्ताम् ॐ मनुष्याः तृप्यन्ताम् ॐ यक्षाः तृप्यन्ताम् ॐ रक्षांसि तृप्यन्ताम् ॐ पिशाचाः तृप्यन्ताम् ॐ सुपर्णाः तृप्यन्ताम् ॐ भूतानि तृप्यन्ताम् ॐ पशवः तृप्यन्ताम् ॐ वनस्पतयः तृप्यन्ताम् ॐ ओषधयः तृप्यन्ताम् ॐ भूतग्रामश्चतुर्विधः तृप्यताम्, इत्येकैकमञ्जलिं क्षिपेत्। ततो निवीती भूत्वा उत्तराभिमुखः प्रजापतितीर्थेन अक्षतमिश्रितजलेन तर्पयेत् ॐ भूर्भुवः स्वः सनकादिसप्तमनुष्या इहागच्छन्तु इह तिष्ठन्तु गृह्णन्तु एताञ्जलाञ्जलीन् इत्यावाह्य ॐ सनकः तृप्यताम् ॐ सनन्दनः तृप्यताम् २ ॐ सनातनः तृप्यताम् २ ॐ कपिलः तृप्यताम् २ ॐ आसुरिः

तृप्यताम् २ ॐ वोढुः तृप्यताम् २ ॐ पञ्चशिखः तृप्यताम् २ ॥ अपसव्यं विधाय प्राचीनावीती दक्षिणाभिमुखो भूत्वा द्विगुणितदर्भखड्ग-पात्रपाणिः पितृतीर्थेन अपसव्येन तिलमिश्रितजलेन तर्पयेत्, ॐ भूर्भुवः स्वः कव्यवाडनलादयो दिव्याः पितर इहागच्छन्तु इह गृह्णन्तु एताञ्जला-ञ्जलीन् ॐ कव्यवाडनलः तृप्यताम् ॐ कव्यवाडनलः तृप्यताम् ॐ कव्य-वाडनलः तृप्यताम् ॐ सोमः तृप्यताम् ३ ॐ यमः तृप्यताम् ३ ॐ अर्यमाः तृप्यताम् ३ ॐ अग्निष्वात्ताः पितरः तृप्यन्ताम् ३ ॐ सोमपाः पितरः तृप्यन्ताम् ३ ॐ बर्हिषदः पितरः तृप्यन्ताम् ३ । ॐ भूर्भुवः स्वः यमादिचतुर्दशयमाः इहागच्छन्तु इह तिष्ठन्तु गृह्णन्त्वेताञ्जलाञ्जलीन् इत्यावाह्य ॐ यमाय नमः ३ ॐ धर्मराजाय० ३ ॐ मृत्यवे० ३ ॐ अन्तकाय० ३ ॐ वैवस्वताय० ३ ॐ कालाय० ३ ॐ सर्वभूतक्षयाय० ३ ॐ औदुम्बराय० ३ ॐ दध्नाय० ३ ॐ नीलाय० ३ ॐ परमेष्ठिने० ३ ॐ वृकोदराय० ३ ॐ चित्राय० ३ ॐ चित्रगुप्ताय नमः ३ ॐ उदीरतामवर ऽउत्परासऽउन्मध्यमाः पितरः सोम्म्यासः । असुंय ऽ ईयुरवृका ऽ ऋतज्ञास्तेनोऽवन्तु पितरो हवेषु ॥ १ ॥ ॐ अङ्गिरसोनः पितरो नवग्वा ऽ अथर्व्वाणो भृगवः सोम्यासः तेषां वयꣳसुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥२॥ ॐ आयन्तुनः पितरः सोम्म्यासोग्निष्वात्ताः पथिभिर्देवयानैः । अस्मिन्यज्ञे स्वधयामदन्तोधिब्रुवन्तु तेऽवन्त्वस्मान् ॥ ३ ॥ ॐ ऊर्ज्जंव्वहन्तीरमृतङ्घृतम्पयः कीलालं परिश्रुतम् स्वधास्थ तर्प्पयत मे पितॄन् ॥ ४ ॥ ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन्पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् ॥ ५ ॥ ॐ ये चेह पितरो ये च नेहयाँश्च विद्मयाँश्च उ चन प्रविद्म त्वं वे त्थयतिथे

जातवेदः स्वधाभिर्य्यज्ञ ᳪ सुकृतं जुषस्व ॥ ६ ॥ ॐ मधु ३ ॐ मधु-
व्वाता ऽ ऋतायते मधु क्षरन्ति सिन्धवः माद्ध्वीर्नः सन्त्वोषधीः ॥७॥
ॐ मधुनक्तमुतोषसो मधु मत्पार्थिवᳪरजः मधुद्यौरस्तु नः पिता ॐ
मधुमान्नो व्वनस्पतिर्म्मधुमाँ ऽ अस्तु सूर्य्यः माद्ध्वीर्गावो भवन्तु नः
ॐ मधु मधु मधु इति पठित्वा ॐ तृप्यध्वम् ३ ॐ अद्येहेत्यादि देशका-
लाद्युच्चार्य अमुकगोत्रः **अस्मत्पिता** अमुकशर्मा ( वर्मा, गुप्तः, दासः )
वसुस्वरूपः तृप्यताम् इदं जलं सतिलं तस्मै स्वधा ॐ तृप्यध्वम् ३ ॐ
अद्येहेत्यादि देशकालाद्युच्चार्य अमुकगोत्रः **अस्मत्पितामहः** अमुकशर्म्मा
( वर्मा, गुप्तः, दासः ) रुद्रस्वरूपः तृप्यताम् इदं जलं सतिलं तस्मै स्वधा
ॐ तृप्यध्वम् ३ ॐ अद्येहेत्यादिदेशकालौ स्मृत्वा अमुकगोत्रः **अस्मत्प्रपि-
तामहः** अमुकशर्मा ( वर्मा, गुप्तः, दासः ) आदित्यस्वरूपः तृप्यताम् इदं
जलं सतिलं तस्मै स्वधा तृप्यध्वम् ३ इति विचार्य्य वदेत् ततो मात्रा-
दितर्पणं कुर्यात्। ॐ अद्येहेत्यादि देशकालौ संकीर्त्य अमुकगोत्रा **अस्म-
न्माता** अमुकी देवी वसुस्वरूपा तृप्यताम् इदं जलं सतिलं तस्यै स्वधा
तृप्यध्वम् ३ इति त्रिवारं वदेत् ॐ अद्येहेत्याद्युक्त्वा अमुकगोत्रा **अस्मत्पि-
तामही** अमुकी देवी रुद्रस्वरूपा तृप्यताम् इदं जलं तस्यै स्वधा तृप्यध्वम्
३ इति त्रिवारं वदेत् ॐ अद्येहेत्यादिदेशकालयोः संकीर्तनान्ते अमुकगोत्रा
**अस्मत्प्रपितामही** अमुकी देवी आदित्यस्वरूपा तृप्यताम् इदं जलं तस्यै
स्वधा तृप्यध्वम् ३ इति त्रिवारं वदेत्, ततो मातामहान् तर्पयेत्, ॐ नमो
वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो
वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो
वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो द्वेष्यै तद्वः
पितरो व्वास ऽआधत्त ॐ अद्येहेत्यादि० अमुकगोत्रः **अस्मन्मातामहः**

अमुकशर्म्मा (वर्मा, गुप्तः, दासः) वसुस्वरूपः तृप्यताम् इदं जलं सतिलं तस्मै स्वधा तृप्यध्वम् ३ इति त्रिवारं वदेत्, ॐ अद्येहेत्यादि० अमुकगोत्रः **अस्मत्प्रमातामहः** अमुकशर्मा [वर्मा, गुप्तः, दासः] रुद्रस्वरूपः तृप्यताम् इदं जलं सतिलं तस्मै स्वधा तृप्यध्वम् ३ इति त्रिवारं वदेत् ॐ अद्येहे-त्यादि० अमुकगोत्रः **अस्मद्वृद्धप्रमातामहः** अमुकशर्मा ( वर्मा, गुप्तः दासः) आदित्यस्वरूपः तृप्यताम् इदं जलं सतिलं तस्मै स्वधा ॐ तृप्यध्वम् ३ इति त्रिवारं वदेत्, ॐ अद्येहेत्याद्युच्चार्यअमुकगोत्रा **अस्मन्मातामही** अमुकी देवी वसुस्वरूपा तृप्यताम् इदं जलं सतिलं तस्यै स्वधा तृप्यध्वम् ३ इति त्रिवारं वदेत्, अद्येहेत्यादि देशकालौ संकीर्त्य अमुकगोत्रा **अस्म-त्प्रमातामही** अमुकी देवी रुद्रस्वरूपा तृप्यताम् इदं जलं सतिलं तस्यै स्वधा तृप्यध्वम् ३ इति त्रिवारं वदेत्, ॐ अद्येहेत्यादि० अमुकगोत्रा **अस्मद्वृद्धप्रमातामही** अमुकी देवी आदित्यस्वरूपा तृप्यताम् इदं जलं सतिलं तस्यै स्वधा तृप्यध्वम् ३ इति त्रिवारं वदेत् ॥

[ ततः, ताताम्बात्रितयं सपत्नजननी मातामहादित्रयम् ।
सस्त्रि, स्त्रीतनयादि तातजननीस्वभ्रातरः तत्स्त्रियः ॥
ताताम्बात्मभगिन्यपत्यधवयुग् जायापिता सद्गुरुः ।
शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे ॥

इति श्लोके परिगणितानां तत्तद्गोत्रतत्तनामपूर्वकम् एकैकम् अञ्जलिं दद्यात् ततो गुर्वादीन् तर्पयेत् ] ॐ गुरवः तृप्यन्ताम् ॐ आचार्याः तृप्यन्ताम् ॐ शिष्याः तृप्यन्ताम् ॐ ऋत्विजः तृप्यन्ताम् ॐ ज्ञातयः तृप्यन्ताम् ॐ बान्धवाः तृप्यन्ताम् ।

ॐ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥ १ ॥

अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ॥ २ ॥

आब्रह्मणो ये पितृवंशजाता मातुस्तथा वंशभवा मदीयाः ।
कुलद्वये ये मम सङ्गताश्च भृत्यास्तथैवाश्रितसेवकाश्च ॥ ३ ॥
मित्राणि शिष्याः पशवश्च भृत्याः स्पृष्टाश्च दृष्टाश्च कृतोपकाराः ।
जन्मान्तरे ये मम संगताश्च तेभ्यः स्वधा तोयमिदं ददामि॥४॥

देवासुरास्तथा नागा यक्षगन्धर्वकिन्नराः ।
पिशाचा गुह्यकाः सिद्धाः कूष्माण्डाः तरवस्तथा ॥ ५ ॥
जलेचरा भूमिचरा वाय्वाहाराश्च जन्तवः ।
तृप्तिं मे तेन यान्त्वाशु मद्दत्तेनाम्बुनाऽखिलाः ॥ ६ ॥
नरकेषु समस्तेषु यातनासु च संस्थिताः ।
तेषामाप्यायनायैतद्दीयते सलिलं मया ॥ ७ ॥
यत्र क्वचन संस्थानां क्षुत्तृषोपहतात्मनाम् ।
इदमक्षय्यमेवास्तु मया दत्तं तिलोदकम् ॥ ८ ॥
पितृवंशे मृता ये च मातृवंशे च ये मृताः ।
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः ॥ ९ ॥
ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः ।
क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा ॥ १० ॥
विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम ।
तेषामाप्यायनायैतद् दीयते सलिलं मया ॥ ११ ॥
येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते तृप्तिमखिला यान्तु ये मत्तोयाभिकांक्षिणः ॥ १२ ॥

इति तर्पणं कृत्वा स्नानवस्त्रं निपीडयेत् वक्ष्यमाणमन्त्रेण-

"ये चास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः।

ते पिबन्तु मया दत्तं वस्त्रनिष्पीडितोदकम् ॥'

इति वासो निष्पीड्य सव्येन हस्तौ पादौ प्रक्षाल्य आचम्य जले पद्माकारं विलिख्य ब्रह्मादीन् पूजयेत्। ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः सबुध्न्याऽउपमाऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः॥ ॐ ब्रह्मणे नमः इति ब्रह्माणं सम्पूजयेत्। ॐ इदं विष्णुर्व्विचक्रमे त्रेधा निदधे पदम्, समूढमस्यपाᳪंसुरे॥

ॐ विष्णवे नमः इति विष्णुं सम्पूज्य ॐ नमस्ते रुद्रमन्यवऽ उतोतऽ इषवे नमः बाहुभ्यामुतते नमः ॐ रुद्राय नमः इति रुद्रं सम्पूज्य ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॐ सवित्रे नमः इति सवितारं सम्पूजयेत्, ॐ मित्रस्य चर्षणी धृतोवो देवस्य मनसि द्युम्नश्चित्रश्रवस्तमम् ॐ मित्राय नमः इति मित्रं सम्पूजयेत् ॐ इमम्मे व्वरुणश्रुधी हवमद्या च मृडय त्वामवस्युराचके॥ ॐ वरुणाय नमः इति वरुणं सम्पूजयेत् ॐ अदृश्रमस्य केतवो व्विरश्मयो जनाँ २ऽअनु भ्राजन्तोऽअग्नयो यथा॥ इति गन्धाक्षतपुष्पैः जले सूर्याय अर्घ्यं दद्यात्।

इति सूर्य सहस्रांशो तेजोराशे जगत्पते।

अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर॥

ततः उपस्थानं कुर्यात्, ॐ हᳪंसः शुचिषद्वसुरन्तरिक्षसद्धोता व्वेदिषदतिथिर्दुरोणसत्, नृषद्वरसदृतसद्व्योमसदब्जा गोजाऽ ऋतजाऽ अद्रिजाऽ ऋतं बृहत्, ततो हस्तौ संहतौ कृत्वा प्राच्यैदिशे

ॐ इन्द्राय नमः आग्नेय्यै दिशे ॐ अग्नये नमः याम्यै दिशे ॐ यमाय नमः नैर्ऋत्यै दिशे ॐ निर्ऋतये नमः प्रतीच्यै दिशे ॐ वरुणाय नमः वायव्यै दिशे ॐ वायवे नमः उदीच्यै दिशे ॐ कुबेराय नमः ईशान्यै दिशे ॐ ईश्वराय नमः ऊर्ध्वायै दिशे ॐ ब्रह्मणे नमः अधोदिशे ॐ अनन्ताय नमः पुनः देवतीर्थेन जले तर्पणम्। ॐ ब्रह्मणे नमः ॐ अग्नये० ॐ पृथिव्यै० ॐ ओषधीभ्यो० ॐ वाचे० ॐ वाचस्पतये० ॐ विष्णवे० ॐ महद्भ्यो० ॐ अद्भ्यो० ॐ अपाम्पते वरुणाय नमः ॐ संवर्चसा पयसा सन्तनूभिरगन्महि मनसा सꣳशिवेन त्वष्टा सुदत्रो विदधातु रायो नुमार्ष्टु तन्वो यद्विलिष्टम्। इति तज्जलस्पर्शं कृत्वा मुखं विमृशेत्। ॐ देवागातु विदोगातुं वित्त्वागातुमित। मनसस्पतऽ-इमन्देव यज्ञꣳस्वाहा वातेधाः इति पठित्वा आचामेत्।

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥

ॐ अच्युताय नमः ३ इति तर्पणप्रयोगः॥

## ३ तीर्थप्राप्तिनिमित्तकगोदानविधिः।

अर्घ्यं संस्थाप्य प्राणानायम्य कुशतिलयवजलान्यादाय ॐ विष्णुः ३ अद्येहेत्यादि—देशकालौ संकीर्त्य अमुकोऽहं श्रुतिस्मृतिपुराणोक्तफलावाप्तये सकलपापक्षयार्थम् अमुकतीर्थे गोदानं करिष्ये तदङ्गतया गोः पूजनं करिष्ये गोदान—प्रतिग्रहार्थं ब्राह्मणस्य पूजनपूर्वकं वरणं च करिष्ये।

भूमिदेवाग्रजन्मासि त्वं विप्र पुरुषोत्तम।
प्रत्यक्षं यज्ञपुरुषो ह्यर्घोऽयं प्रतिगृह्यताम्॥

इति-अर्घ्यं दत्त्वा ब्राह्मणं गन्धपुष्पादिभिः पूजयेत्।

गन्धविलेपनं—

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

इति सम्पूज्य एभिर्गन्धाक्षतपुष्पपूगीफलद्रव्ययज्ञोपवीतवासोऽलङ्करणादिभिः गोदानप्रतिग्रहार्थं ब्रह्मन् त्वाम् अहं वृणे इति ब्रह्मवरणं कुर्यात् । ततः गोपूजनं कुर्यात् ।

ध्यानम्—

आवाहयाम्यहं देवि गां त्वां त्रैलोक्यमातरम् ।
यस्याः स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥

इति ध्यानम् गवे नमः आवाहनम् आसनार्थं पुष्पं च समर्पयामि ततः पाद्यं गोः अग्रपादाभ्यां नमः, गोः आस्याय नमः गोः कर्णाभ्यां नमः गोः शृङ्गाभ्यां नमः, गोः स्कन्धद्वयाय नमः गोः पृष्ठाय नमः गोः पुच्छाय नमः गोः पश्चात्पादाभ्यां नमः, सवत्सायै गवे नमः इति पाद्यादिभिः सम्पूज्य प्रार्थयेत् ।

प्रार्थना—

गवाम् अङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात् तस्मात् शिवं मे स्यादिह लोके परत्र च ॥

वस्त्रम्—

आच्छादनं मया दत्तं शुद्धं चैव सुनिर्मलम् ।
सुरभे वस्त्रदानेन प्रीयतां परमेश्वरि ॥

गौः धूपः प्रतिगृह्यताम्, इति धूपं समर्पयेत् ।

दीपः—आनन्दकृत् सर्वलोके देवानां च सदा प्रिये।
गौः त्वं पाहि जगन्नाथे दीपोऽयं प्रतिगृह्यताम् ॥
सवत्सायै गवे नमः इति दीपं समर्पयेत्।

गोग्रासः—

सुरभिर्वैष्णवी माता नित्यं विष्णुपदे स्थिता ।
गोग्रासस्तु मया दत्तो गोविन्दः प्रीयतामिति ॥

इति गोग्रासं दत्त्वा ताम्बूलादिकं भूषणार्थं द्रव्यं समर्प्य जपं विधाय नीराजनं कृत्वा पुष्पाञ्जलिं समर्प्य गोः प्रदक्षिणाः कुर्यात् ।

प्रदक्षिणाः—

या लक्ष्मीः सर्वदेवानां या च देवी च रोहिणी ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥
विष्णोर्वक्षसि या देवी स्वाहा या च विभावसोः ।
चन्द्रार्कशक्तिःशक्रश्रीः सा धेनुर्वरदा मम ॥

इति प्रदक्षिणीकृत्य नमस्कुर्यात् ।

नमस्कारः—

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

ततो गोपूजनं कृत्वा गोपुच्छोदकतर्पणं कुर्यात ।

देवाधिदेवताश्चैव तथा प्रत्यधिदेवताः ।
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ।
ऋषयो मानवा ये च मृत्योश्च यमदेवताः ।
आदित्याः वसवो रुद्राः विश्वेदेवाः मरुद्गणाः ॥

ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ।
वायुर्जलान्तरिक्षञ्च तथैव च दिवौकसः ॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ।
स्वाहा स्वधा तथा लक्ष्मीः पुष्टिः श्रद्धा सरस्वती ॥
मेधा कीर्तिस्तथा दीप्तिः कीर्तिश्चैव स्वरोपमा ।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥
गन्धर्वाः किन्नराश्चैव ये चान्येऽप्सरसाङ्गणाः ।
पुलस्त्यः पुलहश्चैव प्रचेता भृगुरेव च ॥
वशिष्ठांगिरसौ चैव अत्रिः पाराशरस्तथा ।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥
ब्रह्मलोकं गता ये च विष्णुलोकं गतास्तथा ।
शिवलोकं गता ये च ये च वैवस्वतं गताः ॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ।
सनकः सनन्दनश्चैव सनातनस्तथैव च ॥
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥
कव्यवाडनलः सोमो यमश्चैवार्यमा तथा ।
अग्निष्वात्ताश्च पितरः सोमपा आज्यपास्तथा ॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ।
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ॥
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
माता पितामही चैव तथैव प्रपितामही ॥

ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ।
मातामहः प्रमाता च वृद्धप्रमातामहस्तथा ॥
मातामही प्रमाता च वृद्धप्रमातामही तथा ।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥
असिपत्रवने घोरे कुम्भीपाके च ये स्थिताः ।
वियोनिषु गता ये च ब्रह्माण्डोदरमध्यगाः ॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ।
विरूपा आमगर्भाश्च जाताजाताः कुले मम ॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥
पितृवंशे मृता ये च मातृवंशे च ये मृताः ।
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः ॥
स्थानभ्रंशान्मृता ये च शस्त्राग्निविषबन्धनात् ।
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥
सिंहश्वाननिवासेषु ये च मूत्रपुरीषतः ।
सर्वे देवाश्च मुनयः सर्वे वै मानवा जनाः ॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ।

ततो देवतां ध्यायेत्—

ध्यानम्—पञ्च गावः समुत्पन्नाः मथ्यमाने महोदधौ ।
तासां मध्ये तु या नन्दा तस्यै देव्यै नमो नमः ॥

ततो गोः अङ्गपूजनम्—ॐ ब्रह्मणे नमः कण्ठे पूजयामि, ॐ विष्णवे० मुखे०, ॐ रुद्राय० मध्ये०, ॐ देवगणेभ्यो० रोमकूपेषु०, ॐ महर्षिभ्यो० पुच्छे०, ॐ गोभ्यो० मुखाग्रे०, ॐ कुलपर्वतेभ्यो० मूलस्थाने०, ॐ गङ्गादिनदीभ्यो० शृङ्गयोः०, ॐ शशिभास्कराभ्यां नमः नेत्रयोः पूजयामि ।

एते यस्यास्तनौ देवाः सा धेनुर्वरदा मम ॥

अथ दानं—ताम्रपात्रे आज्यं तिलसहितं निक्षिप्य तस्मिन् गोपुच्छं निधाय कुशतिलयवजलान्यादाय अद्येहेत्यादि देशकालौ संकीर्त्य अमुकोऽहममुकतीर्थयात्रासाङ्गफलप्राप्त्यर्थम् इमां गां सवत्सां यथाशक्त्यलंकृतां रुद्रदैवताममुकगोत्राय अमुकप्रवराय अमुकवेदाध्यायिने अमुकशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे कृतैतद्गोदानस्य साङ्गफलप्राप्त्यर्थम् इदं सुवर्णं घृतपात्रसहितं ब्राह्मणाय तुभ्यं सम्प्रददे ॐ तत्सन्न मम इति गोपुच्छं विप्रकरे दद्यात् ।

ॐ यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥

प्रार्थना—गावः सुरभयो नित्यं गावो गुग्गुलगन्धिकाः ।
गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् ॥
अन्नमेव परं गावो देवानां हविरुत्तमम् ।
पावनं सर्वभूतानां गावः शरणमुत्तमम् ॥
गावः पवित्रं परमं गावो मङ्गलमुत्तमम् ।
गावः स्वर्गस्य सोपानं गावो धन्याः सनातनाः ॥
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः ।
घृतनद्यो घृतावर्त्तास्ता मे सन्तु सदा गृहे ॥

इति जपित्वा विसृज्य ततो भूयसीं दद्यात्, ब्राह्मणान् भोजयेच्च ।

इति गोदानविधिः ।

## ( ४ ) अथ गजदानविधिः ।

दद्याद् गजं पुराणोक्तं मूल्यं पञ्चशतानि च ।
वित्तानुसारात्तत्रापि कनिष्ठोत्तममध्यमम् ॥

तत्रापि स्वरूपतो गजदानम् उत्तमं, तन्मूल्यहेममाषशतपञ्चक-दानं मध्यमं, शतत्रयहेममाषदानं कनिष्ठम् ।

रूप्यस्थूणालङ्करणं स्वर्णताराविभूषणम् ।
सदक्षिणं वित्तशक्त्या दत्त्वा शिवपुरं व्रजेत् ॥

[ स्थूणा=रज्जुः । तारा = मौक्तिकजातः गजालङ्कारः ]

कौर्मे—यथालाभे प्रपन्ने वा यः प्रयच्छति दन्तिनम् ।
ब्राह्मणाय दरिद्राय स्वर्गलोके महीयते ॥

अथ क्रमः—अर्घ्यं संस्थाप्य प्राणानायम्य अद्येहेत्यादि देशकालौ संकीर्त्य अमुकोऽहं श्रुतिस्मृतिपुराणोक्तफलावाप्तये गजदानाङ्गत्वेन शिवं पूजयिष्ये तथा तत्प्रतिग्रहार्थं ब्राह्मणस्य पूजनपूर्वकं वरणं करिष्ये । भूमिदेवाग्रेति अर्घ्यं दत्त्वा गन्धद्वारामिति गन्धं, नमो ब्रह्मण्यदेवायेति पूजनं विधाय, एभिर्गन्धाक्षतपुष्पपूगीफलद्रव्यवासोऽलङ्करणादिभिर्गज-दानप्रतिग्रहार्थं त्वाम् अहं वृणे 'ॐ वृतोस्मि' इति प्रत्युक्तिः । ततो गजदानाङ्गं शिवं गजं च नीराजनान्तं सम्पूज्य दानं कुर्यात् । अद्ये-हेत्यादि देशकालौ संकीर्त्य अमुकोऽहं मम सर्वपापक्षयोत्तरसिद्धचारण-सेवितार्कवर्णकिंकिणीजालिविमानारोहणोत्तरानेकमन्वन्तरावच्छिन्नाक्षयदे-वराजत्वान्तेविष्णुपुरप्राप्तिकामः तत्प्रीतिकामश्च इमं गजं राजतरज्ज्वा-स्थिरामनसहितं चामरगन्धपुष्पाद्यलङ्कृतं प्रजापतिदैवतं सालंकृताय अमुकशर्मणे अमुकप्रवराय अमुकवेदाध्यायिने अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॐ तत्सन्न मम । इति करं धृत्वा दद्यात् । करः

शुण्डादण्डः। कृतैतद्गजदानकर्मणः साङ्गतासिद्ध्यर्थमिदं सुवर्णमग्निदैवतं दक्षिणात्वेन तुभ्यमहं सम्प्रददे। ततो द्विजो गजमारुह्य—

ॐ देवस्य त्वा सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। इति यथाशाखं कामस्तुतिं पठित्वा 'स्वस्ति' इति वदेत्। ततो यजमानो गजं प्रार्थयेत्।

प्रार्थना—ऐरावतश्चतुर्दन्तो गजानां नायकस्तु यः।
दिग्दन्तिनां पूज्यतमः पापं क्षयतु नः प्रभुः॥
सुप्रतीक गजेन्द्र त्वं सरस्वत्याभिषेचक।
इन्द्रस्य वाहनश्रेष्ठ सर्वदेवैश्च पूजित॥
गजेन्द्र मत्तमातङ्ग दैत्यसैन्यविनाशक।
तव दानेन मे शान्तिः सर्वदाऽस्तु महासुखम्॥

ब्राह्मणस्तु तथेत्युक्त्वा भूयसीं दत्त्वा ब्राह्मणान्भोजयेत्॥

इति गजदानम्।

## (९) अथ अश्वदानविधिः।

महाभारते—सर्वोपकरणोपेतं युवानं दोषवर्जितम्।
योऽश्वं ददाति विप्राय स्वर्गलोके महीयते॥
तथा यावन्ति रोमाणि हये सन्ति नरेश्वर।
तावन्तोऽब्दानि सूर्यस्य लोकान्प्राप्नोति पुष्कलान्॥

कौर्मे—शतैः पञ्चपलै रौप्यैः सुवर्णालङ्कृतिं तथा।
सदक्षिणं सवस्त्रं च ब्राह्मणाय निवेदयेत्॥

तत्र क्रमः—गणेशं नत्वा अर्घ्यं संस्थाप्य प्राणानायम्य अद्येहेत्यादि अमुकोऽहं श्रुतिस्मृतिपुराणोक्तफलावाप्तये अश्वदानं करिष्ये, अश्व-

...INSTITUTE OF AD... Acc. No. 6622

दानाङ्गत्वेन अश्वस्य यथामिलितोपचारैः पूजनं च करिष्ये, तत्प्रतिग्रहार्थं ब्राह्मणस्य पूजनपूर्वकं वरणं च करिष्ये, भूमिदेवाग्रेत्यर्घं, गन्धद्वारामिति गन्धं, तं यज्ञमित्यक्षताः, नमो ब्रह्मण्यदेवायेति पूजनं विधाय, एभिर्गन्धाक्षतपुष्पपूगीफलद्रव्यवासोऽलङ्करणादिभिः अश्वदानप्रतिग्रहार्थं त्वामहं वृणे 'ॐ वृतोऽस्मि' इति प्रत्युक्तिः। ततोऽश्वस्य नीराजनान्तं सम्पूज्य दानसङ्कल्पः—अद्येहेत्यादि देशकालौ संकीर्त्य अमुकोऽहं मम समस्तपापक्षयपूर्वकमश्वरोमसंख्याकाब्दसूर्यलोकनिवासाप्तिकामः इममश्वं सर्वोपस्करसहितं हिरण्यदक्षिणायुतममुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॐ तत्सन्न मम इति कर्णं धृत्वा ददेत्।

दानमन्त्रः—उच्चैःश्रवास्त्वमश्वानां राज्ञां विजयकारकः।
सूर्यवाह नमस्तेऽस्तु कलौ कर्तुमनीश्वर ॥

इति प्रार्थ्य भूयसीं दत्त्वा ब्राह्मणान् भोजयेत्।

इति अश्वदानविधिः ॥

## ( ६ ) अथ श्वेताश्वदानविधिः।

अश्वदानं तु तेनेह कर्तव्यं विधिपूर्वकम्।
विधिं तस्य प्रवक्ष्यामि ब्रह्मणा निर्मितं पुरा ॥
श्वेतमश्वं शुभं तात हेमपुष्पाभिभूषितम्।
रूप्यैस्तु कटकैः शुद्धैः करिदन्तोपशोभितम् ॥
वज्रनेत्रं खुरैस्ताम्रैः क्षौमपुच्छं सुवाससम्।
शुभ्रेण पट्टकेनैव संयुक्तं स्वायुधान्वितम् ॥
धान्यरत्नोपरिस्थन्तु बद्धकक्ष्यसुपट्टकम्।
एवं सुतेजसं चाश्वं ब्राह्मणाय निवेदयेत् ॥

मन्वादियुगाद्ययने विषुवोपरागादिपुण्यकाले दानं कार्यम् । तत्र क्रमः—अद्येहेत्यादि अमुकोऽहं श्रुतिस्मृतिपुराणोक्तफलावाप्तये सकलपापक्षयार्थं श्वेताश्वदानं करिष्ये, श्वेताश्वदानाङ्गत्वेन अश्वं पूजयिष्ये तथा तत्प्रतिग्रहार्थे ब्राह्मणस्य पूजनपूर्वकं वरणं करिष्ये, पूर्ववद्ब्राह्मणं सम्पूज्य अश्वं च नीराजनान्तं सम्पूज्य प्रार्थयेत् ।

प्रार्थना——मार्तण्डाय सुवेगाय काश्यपाय त्रिमूर्तये ।
जगदीशाय सूर्याय त्रिवेदाय नमोऽस्तु ते ।।

इति मन्त्रमुच्चरन् कर्णे दद्यात् तिलोदकम् । अद्येहेत्यादि अमुकगोत्रोऽहं सकलब्रह्महत्यादिनाशकामः अश्वरोमसमसंख्याकाब्दसूर्यलोकनिवासकामश्च इमं श्वेताश्वं सुवर्णतिलकालंकारयुतं ललाटग्रैवेयकालंकारयुतं गन्धपुष्पाद्यर्चितं सूर्ययमदैवतममुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॐ तत्सन्न मम ।

कृतैतत् श्वेताश्वदानप्रतिष्ठासिद्ध्यर्थमिदं सुवर्णं सूर्ययमदैवतं ब्राह्मणाय तुभ्यमहं सम्प्रददे ॐ तत्सन्न मम इति दद्यात् । ततः श्वेताश्वं प्रार्थयेत् ।

प्रार्थना——महारात्रिसमुत्पन्न उच्चैःश्रवस पत्रक ।
मया त्वं विप्रमुख्याय दत्तो हय सुखीभव ।।

ततो विप्रं प्रार्थयेत ।

प्रार्थना——इमं विप्र नमस्तुभ्यमश्वं ते प्रतिपादितम् ।
प्रतिगृह्णीष्व विप्रेन्द्र मया दत्तं सुशोभन ।।

इति मन्त्रं उच्चार्य कर्णे समर्पणं कृत्वा विप्रहस्ते जलं प्रक्षिपेत् । ततः सुवर्णदक्षिणां दद्यात् । विप्रो देवस्यत्वेति गृहीत्वा यथाशाखं कामस्तुतिं पठेत् 'स्वस्ति' इत्युक्त्वा श्वेताश्वमारुह्य गच्छेत् ।

दाता अश्वपुरो गच्छेत्पदानां सप्तविंशतिम् ।
भास्करं मनसि ध्यात्वा आलोक्य स्वगृहं व्रजेत् ॥
श्वेतमश्वं तु यो दद्यात् फलं शतगुणं भवेत् ।
एवं कृते नरव्याघ्र सूर्यलोकं व्रजेन्नरः ॥

इति श्वेताश्वदानम् ।

## ( ७ ) अथ भूमिदानम् ।

ताम्रपात्रे देयभूमिसंबन्धिमृत्पिण्डं संस्थाप्य विधिना अर्घ्यं संस्थाप्य अद्येहेत्यादि देशकालौ संकीर्त्य अमुकोऽहं यथोक्तफलावाप्तये भूमिदानं करिष्ये, भूमिदानकर्मणः पूर्वाङ्गत्वेन भूमेः यथामिलितोपचारैः पूजनमहं करिष्ये ।

ध्यानं—शुक्लवर्णा मही कार्या दिव्याभरणभूषिता ।
चतुर्भुजा सौम्यवपुः चन्द्रांशुसदृशप्रभा ॥
रत्नपात्रं सस्यपात्रं पात्रमोषधिसंयुतम् ।
पद्मं करे च कर्तव्यं भूयो यादवनन्दन ।
दिग्नागानां चतुर्णां च कार्या पृष्ठगता मही ॥

इति ध्यात्वा भूम्यै नमः इति गन्धाक्षतपुष्पैः सम्पूज्य दानसंकल्पः—अद्येहेत्यादि देशकालौ सङ्कीर्त्य अमुकोऽहं सकलपापक्षयार्थं यथोक्तफलावाप्तये इमां सुपूजितां भूमिं लयोत्पत्तियोग्यां विष्णुदैवत्याम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय दास्ये ॐ तत्सन्न मम ।

दानवाक्यं—यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम् ।
दानान्यन्यानि मे शान्तिः भूमिदानाद्भवत्विह ॥

कृतस्य भूमिदानस्य साङ्गतासिद्ध्यर्थमिदं सुवर्णमग्निदैवतं दान-

प्रतिष्ठात्वेन तुभ्यं सम्प्रददे तथा इमां दक्षिणां भूमिदानकर्मणः साद्गुण्यार्थं ब्राह्मणेभ्यो विभज्य दास्ये तथा माधवप्रीतये सिद्धान्नेन आमान्नेन वा यथासंख्यकान् ब्राह्मणान् भोजयिष्ये इति सङ्कल्प्य अभिषेकतिलकं मन्त्रपाठादि कुर्यात् ।

इति भूमिदानम् ।

## ( ८ ) अथ तिलपात्रदानम् ।

तिलाः पुण्याः पवित्राश्च सर्वकामफलप्रदाः ।
शुक्लाश्चैव तथा कृष्णा विष्णुगात्रसमुद्भवाः ॥
यानि कानि च पापानि ब्रह्महत्यासमानि च ।
तिलपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥

इति पठित्वा तिलैः पात्रमापूर्य तदुपरि यथाशक्ति सुवर्णं संस्थाप्य गन्धादिभिः सम्पूज्य ॐ विष्णुः ३ अद्येहेत्यादि देशकालौ संकीर्त्य अमुकोऽहं मम समस्तपापक्षयार्थं श्रीविष्णोः प्रीतये अमुकव्रत-कृतस्य साङ्गफलप्राप्त्यर्थमिदं तिलपात्रं हिरण्यगर्भं यमदैवतं ब्राह्मणाय दास्ये ॐ तत्सन्न मम । इति सङ्कल्प्य ब्राह्मणं सम्पूज्य दद्यात् ।

दानवाक्यं—तिलाः स्वर्णसमायुक्ता दुरितक्षयकारकाः ।
विष्णोः प्रीतिकरा नित्यमतः शान्तिं प्रयच्छ मे ॥

तिलपात्रदानं तु उत्तम–मध्यम–अधम–भेदात् त्रिधा–त्रिंशन्माष-सुवर्णात्मकमुत्तमं, विंशतिमाषात्मकं मध्यमं, दशमाषसुवर्णात्मकमधमम्, अन्यन्माषार्द्धमाषाद्यात्मकं तिलपात्रमात्रम् ।

इति तिलपात्रदानम् ।

## ( ९ ) एकोद्दिष्टश्राद्धविधिः ।

तत्र पारस्करसूत्रं—अथैकोद्दिष्टम्—एकोऽर्घं एकं पवित्रम् एकः पिण्डः न आवाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः सुस्वदितमितीतरे ब्रूयुरुपतिष्ठतामित्यक्षय्यस्थानेऽभिरम्यतामिति विसर्गोऽभिरमिताः स्म इतीतरे । स्नानसङ्कल्पः—यवकुशजलान्यादाय ॐ विष्णुः ३ अद्येहेत्याद्युच्चार्य अमुकगोत्रः अमुकराशिः अमुकशर्मा अहम् [ अपसव्यं विधाय तिलमोटकं गृहीत्वा ] अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणः वसुस्वरूपस्य ( अमुकगोत्राया अस्मन्मातुः अमुकीदेव्याः वसुस्वरूपायाः ) अक्षय्यतृप्तिकामनया सांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धाधिकारसिद्ध्यर्थम् आत्मनः कायशुद्ध्यर्थं मध्याह्नस्नानमहं करिष्ये, ॐ 'कुरुष्व' इति प्रत्युक्तिः । तत्र मध्याह्ने स्नात्वा धौते वाससी परिधाय श्राद्धाङ्गतर्पणं कृत्वा श्राद्धदेशे गत्वा दीपं प्रज्वाल्य पवित्रपाणिर्भूत्वा विष्णुं सम्पूज्य हस्तौ संहतौ कृत्वा—

ॐ यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय ॥
अभीप्सितार्थसिद्ध्यर्थं यः सुरैरपि पूज्यते ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

इति पुष्पाञ्जलिं दत्त्वा ब्राह्मणं तैलाभ्यङ्गं कारयित्वा संस्नाप्य—

कुशोऽसि कुशपुत्रोऽसि ब्रह्मणा निर्मितः पुरा ।
त्वय्यर्चिते सोर्चितोऽस्तु यस्याहं नाम कीर्तये ॥

एतत्त इति प्रतिष्ठा ॐ एतत्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे तेन यज्ञमव तेन यज्ञपतिं तेन मामव। मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनो त्वरिष्टं यज्ञ ँ समिमं दधातु विश्वेदेवा-

सऽइह मादयन्तामोम् प्रतिष्ठ ॐ भूर्भुवः स्वः पितृ ( मातृ ) सम्बन्धि ब्रह्मन् सुप्रतिष्ठितो भव । ततोऽपसव्यं विधाय तिलान्गृहीत्वा अद्ये-हेत्यादि अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणो वसुस्वरूपस्य ( अमुक-गोत्रायाः अस्मन्मातुः अमुकीदेव्याः वसुस्वरूपायाः ) सांवत्सरिकैको-द्दिष्टत्याहश्राद्धे ब्रह्मन् भवान् मया निमन्त्रितः ।

निमन्त्रितोऽस्मि इति प्रत्युक्तिः। हस्तौ संहतौ कृत्वा—

अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥
सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ।
भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि ॥

सव्येन आगतं वः, सुस्वागतम् । अपसव्येन एतद्वः पाद्यमस्तु ।

यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे ।
तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशोधने ॥

इति पठित्वा पादपूजायाम् अत्रं सुगन्धम् अक्षताः पुष्पाणि तुल-सीदलानि च समर्प्य पादार्घदानं सव्येन भूमौ शङ्खचक्रादिकं लिखित्वा आसनम् आसने पात्रं पात्रे पवित्रं पवित्रेस्थो, ॐ वैष्णव्यौ में शन्नो-देवीति जलम् ।

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये ।
शंय्योरभिस्रवन्तु नः । इति जलं
तिलोसि सोमदैवत्यो गोसवे देवनिर्मितः ।

प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रीणयाहि नः स्वधा इति तिलान् प्रक्षिप्य गन्धपुष्पाक्षतादि प्रणवेन तूष्णीं वा निक्षिप्य भो ब्राह्मणाः पादार्घपात्रसम्पत्तिरस्तु 'अस्तु सम्पत्तिः' इतिप्रत्युक्तिः ।

अपसव्येन पितृब्राह्मणपादार्चनविधौ अत्रं नमः सुगन्धोऽस्तु स्वधा अक्षताः पुष्पाणि तुलसीदलानि नमः ॐ विष्णुः ३ अद्येह अमुकगोत्र अस्मत्पितः अमुकशर्मन् वसुस्वरूप ( अमुकगोत्रे अस्मन्मातः अमुकी-देवि वसुस्वरूपे ) अद्य कर्तव्ये सांवत्सरिक एकोद्दिष्टक्षयाहश्राद्धे ब्रह्मन्नेष ते पादार्घोऽस्तु पादार्घदानाचमनं सव्येन स्वयं आचम्य अप-सव्येन ब्राह्मणमाचामयेत्। सव्येन श्राद्धदेशोपवेशनमिति उदङ्मुख-मुपवेशयेत्। ततः कर्मपात्रपूरणं ॐ भूरसि भूमिरस्यदितिरसि विश्व-धाया विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीं दृ्ँ ह पृथिवीं मा हि ँ सीः। भूमौ शङ्खचक्रादिकं लिखित्वा आसनं आसने पात्रं पात्रे पवित्रं पवित्रेस्थो वैष्णव्यौ शन्नोदेवीति जलं, यवोसि यवयास्मद्द्वेषो यवया रातीर्दिवेत्वान्तरिक्षायत्वा पृथिव्यै त्वा शुन्धन्तांल्लोकाः पितृ-षदनाः पितृषदनमसि। तिलोसीति तिलान्। गन्धपुष्पाक्षतादि तूष्णीं निक्षिप्य कर्मपात्रं सुसम्पन्नमस्तु अस्तु सुसम्पन्नं तेन जलेन आत्मानं सम्प्रोक्ष्य प्राणायामं विधाय पुण्डरीकाक्षाय नमः।

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

हस्तौ संहतौ कृत्वा—

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः॥

इति त्रिः पठित्वा—

सप्त व्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ।
चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः।

प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥
श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ॥

इति पठित्वा अपसव्यं विधाय मनसा च पितॄन् (मातॄः) ध्यात्वा ततः अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणो वसुस्वरूपस्य (अमुकगोत्रायाः अस्मन्मातुः अमुकीदेव्याः वसुस्वरूपायाः) सांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धं समारभे इति पठेत्। सव्येन।

पञ्चक्रोशं गयाक्षेत्रं कोशमेकं गयाशिरः।
यत्र यत्र स्मरिष्यामि पितॄणां दत्तमक्षयम् ॥

ततः अपसव्येन तिलमोटकं गृहीत्वा वामकक्ष्यां ॐ सोमस्य नीविरसि विष्णोः शर्मासि शर्म यजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीष्कृधी: इति नीवीं बध्वा ततो दिग्बन्धनं। मोटकान् गृहीत्वा—

अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम्।
तथा बर्हिषदः पान्तु याम्यां ये पितरस्तथा ॥
प्रतीचीमाज्यपाः पान्तु उदीचीमपि सोमपाः।
त्रिदिशश्च गणाः सर्वे रक्षन्तूर्ध्वमधोऽपि वा ॥
रक्षोभूतपिशाचेभ्यः तथैवासुरदोषतः।
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे।
तिला रक्षन्तु दितिजान् दर्भा रक्षन्तु राक्षसान्।
पङ्क्तिं वै श्रोत्रियो रक्षेदतिथिः सर्वरक्षकः ॥
अध ऊर्ध्वं च कोणेषु हविष्मन्तश्च सर्वदा।

ततः सव्येन साग्रान् कुशान् गृहीत्वा कर्मपात्रस्थं जलमभिलोडयेत्। ॐ यद्देवा देवहेडनं देवासश्चकृमा वयम्। अग्निर्मा तस्मादेनसो विश्वान् मुञ्चत्वꣳहसः। यदि दिवा यदि नक्तमेनाꣳसि चकृमा

व्ययम्। व्यायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वँ हसः। यदि जाग्रद्यदि-स्वप्नऽएनाँसि चकृमा व्ययम्। सूर्यो मा तस्मादेनसो विश्वान् मुञ्चत्वँहसः। गायत्र्या वा ततो दर्भतिलयुतञ्जलं गृहीत्वा पिधानं उत्तार्य शूद्रादिदृष्टिदूषितपाकः पूतोऽस्तु गायत्र्याऽन्नं सम्प्रोक्ष्य प्रतिज्ञा-सङ्कल्पः—ॐ विष्णुः ३ नमः परमात्मने श्रीपुराणपुरुषोत्तमाय अत्र पृथिव्यां जम्बूद्वीपे भरतखण्डे आर्यावर्ते पुण्यक्षेत्रे भारतवर्षैकदेशे [ हिमवत्पर्वतैकदेशे ] ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे बौद्धावतारे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कृतत्रेताद्वापरान्ते कलियुगस्य प्रथमचरणे षष्ट्यब्दानां मध्ये अमुकनामसंवत्सरे अमुका-यने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकगोत्रोत्पन्नः अमुकराशिः अमुकशर्माहम् अपसव्येन अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणो वसुस्वरूपस्य [ अमुकगोत्रायाः अस्मत्मातुः अमुकीदेव्याः वसुस्वरूपायाः ] अक्षय्यतृप्तिकामनया अर्घपिण्डसहितमेकोद्दिष्टक्षयाह-श्राद्धविधिना पक्वान्नेन [ मिष्टान्नेन वा ] सांवत्सरिकैकोद्दिष्टक्षयाह-श्राद्धं करिष्ये 'ॐ कुरुष्व' इति प्रत्युक्तिः। ततः आसनं तिलमोटकं गृहीत्वा अद्येह अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणो वसुस्वरूपस्य ( अमुकगोत्रायाः अस्मन्मातुः अमुकीदेव्याः वसुस्वरूपायाः ] अस्मिन् सांवत्सरिक एकोद्दिष्टक्षयाहश्राद्धे इदम् आसनमस्तु सव्येन ॐ भूर्भुवः स्वः इदम् आसनम् आस्यतां आसे ततो हस्तार्घसम्पादनम् भूमौ शङ्ख-चक्रादिकं लिखित्वा आसनम्, आसनोपरि पात्रं, पात्रोपरि पवित्रं पवित्रेस्थो वैष्णव्यौ, शन्नोदेवीति जलं, तिलोसीति तिलान्, गन्धपुष्पा-क्षतादि तूष्णीं निक्षिपेत्। भो ब्रह्मन् पित्र्यर्घपात्रं सम्पन्नमस्तु अस्तु सम्पन्नं हस्तार्घं; सव्येन पवित्रं गृहीत्वा विप्रहस्ते समर्प्य सपवित्रेषु

हस्तेषु ॐ या दिव्या आपः पयसा संबभूवुर्याऽअन्तरिक्षा उतपार्थवीर्याः हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः शᳪस्योनाः सुहवा भवन्तु।

ॐ विष्णुः ३ अद्येह० अमुकगोत्रः अस्मत्पितः अमुकशर्मन् वसुस्वरूप [ अमुकगोत्रे अस्मन्मातः अमुकीदेवि वसुस्वरूपे ] अस्मिन् सांवत्सरिक एकोद्दिष्टक्षयाहश्राद्धे एष ते हस्तार्घोऽस्तु। पुनः प्रत्यर्घं च–

अर्घोदकं श्रियं दद्यात् पुत्रपौत्रादिवर्धनम्।
यस्मात् तस्मात् शिवं मे स्यात् इह लोके परत्र च ॥

इति मूर्द्धानम् अभिषिच्य अपसव्येन पितृवामभागे कुशान् आस्तीर्य तदुपरि सपवित्रमर्घपात्रं पितृभ्यः स्थानमसीति न्युब्जं कृत्वा तदुपरि स्वधावाचनीयान् सपवित्रान् त्रीन्कुशान् दक्षिणाग्रान् संस्थाप्य आचारात् शुन्धन्तांल्लोकाः पितृषदनाः पितृषदनमसि इति सम्प्रोक्ष्य पितृभ्यः स्वधायिभ्य इति पूजनं ततोऽङ्गुष्ठपवित्रे त्यक्त्वा पितृब्राह्मणर्चाविधौ अत्रं नमः। ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन्न पितरो मीमदन्तपितरो तीतृपन्त पितरो पितरः शुन्धध्वम् । गन्धोस्तु स्वधा अक्षताः पुष्पाणि तुलसीदलानि धूपदीपवस्त्रभूषणताम्बूलादि दत्त्वा पुनः पवित्रे करे कृत्वा अद्येह० अमुकगोत्र अस्मत्पितः अमुकशर्मन् वसुस्वरूप ( अमुकगोत्रे अस्मन्मातः अमुकि देवि वसुस्वरूपे ) अस्मिन्सांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धे विप्रार्चनविधौ इ मानि गन्धाक्षतपुष्पतुलसीदलदीपवासोभूषण ताम्बूलादीनि मद्दत्तानि ते स्वधा विप्रार्चनविधेः सर्वं परिपूर्णमस्तु अस्तु परिपूर्णम्। गन्धादिदानाचमनं सव्येन स्वयम् आचम्य अपसव्येन ब्राह्मणम् आचामयेत्। सव्येन अच्युतस्मरणं ततो विष्णवे नैवेद्यं परिवेष्य समर्पयेत् नाभ्याऽआसीदन्तरिक्षᳪ

शीर्ष्णो द्यौः समवर्तत पद्भ्यां भूमिर्दिशः श्रोत्रात्तथाल्लोकां २॥ऽअकल्पयन् इति निवेद्य अपसव्यं विधाय—

यथा चक्रायुधो विष्णुः त्रैलोक्यं परिरक्षति ।
एवं मण्डलभस्माङ्कः सर्वभूतानि रक्षतु ॥

इति भस्मना चतुष्कोणमण्डलं विधाय तदुपरि भोजनपात्रं संस्थाप्य सव्येन अन्नं परिवेष्य गायत्र्या अन्नं सम्प्रोक्ष्य अपसव्येन अन्वाचितवामजानुः स्वस्तिकाकृतिना ऊर्ध्वमुखेन दक्षिणोपरिस्थितेन वामहस्तेन मधु मधु मधु इति पात्रमालभ्य जपति—पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि । विष्णो कव्यꣳ रक्ष अप्रादक्षिण्येन तिलान् विकीर्य अपहताऽअसुरा रक्षाꣳसि वेदिषदः । अङ्गुष्ठग्रहणम्—इदं व्विष्णुर्व्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे । इदमन्नम् इमा आपः इदमाज्यम् इदं शाकादिकं सर्वं कव्यम् । ॐ विष्णुः ३ अद्येह० अमुकगोत्राय अस्मत्पित्रे अमुकशर्मणे वसुस्वरूपाय [ अमुकगोत्रायै अस्मन्मात्रे अमुकीदेव्यै वसुस्वरूपायै ] सांवत्सरिक एकोद्दिष्टक्षयाहश्राद्धे इदम् अन्नम् इमा आपः इदम् आज्यम् इदं शाकादिकं यत् परिविष्टं यत् परिवेष्यमाणं ब्राह्मणस्य आतृप्तिपर्यन्तं ब्राह्मणेभ्यः आतृप्तिदास्यमानम् अन्नं च अमृतस्वरूपं मद्दत्तं ते स्वधा । ॐ ये चेह पितरो ये चनेहयांश्च विद्मया २॥ऽउच नप्रविद्म त्वं व्वेत्थ यति ते जातवेदः स्वधाभिः यज्ञꣳ सुकृतं जुषस्व । इत्यपोशानं दत्त्वा भो ब्राह्मणा यथा सुखेन भुङ्ध्वम् । भुञ्ज्महे । ततः सव्येन प्रणवव्याहृतिपूर्विकां गायत्रीं मध्विति ऋक् त्रयं च पठेत् ॥ ॐ मधु ३ ॐ मधु व्वाता ऽऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्न्नः सन्त्वोषधीः । मधुनक्तमुतोषसो मधुमत्पा-

र्थिवꣳ रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमाँ २॥ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः। ॐ मधु मधु मधु। यथाशक्त्या पितृसूक्तं पुरुषसूक्तम् आशुः शिशान० इत्यादि सप्तदशर्चो रुचिस्तवादीनश्नत्सु ब्राह्मणेषु पठेत। ततः तुलसीशर्करागव्यदुग्धाज्यमधुतिलगङ्गाजलयुतम् अन्नं ( मिष्टान्नं वा ) ताम्रादिपात्रे कृत्वा कर्मपात्रोदकं विष्णुनिवेदितं भक्तमपि दत्त्वा अपसव्येन पिण्डं निर्माय विकिरं दद्यात्। विकिरदानं—नैर्ऋत्यां दिशि कुशत्रयं भूमौ क्षिप्त्वा आसनम्—

असंस्कृतप्रमीतानां त्यागिनां कुलभागिनाम्।
उच्छिष्टभागधेयानां दर्भेषु विकिरासनम्॥

इत्यासनं दत्त्वा सजलतिलमोटकयुतम् अन्नं विकिरेत्।

अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥
येषां न पचते माता येषां न पचते पिता।
उच्छिष्टं ये च काङ्क्षन्ति तेभ्योऽन्नं दत्तमक्षयम्॥

उच्छिष्टभागधेयेभ्यो नमः इति गन्धाक्षतपुष्पैः पूजनम्। अङ्गुष्ठपवित्रे त्यक्त्वा हस्तौ पादौ प्रक्षाल्य सव्येन आचम्य ततः श्राद्धदेशम् आगत्य अन्ये अङ्गुष्ठपवित्रे करयोः कृत्वा आचमेत्। अपसव्येन ब्राह्मणहस्ते सकृत् अपो दत्त्वा सव्येन पूर्ववद्गायत्रीं मधुमतीं मध्विति च जपित्वा भो ब्राह्मणा अस्मिन्पाकमध्ये यत्किञ्चिद्रोचते तत्प्रतिगृह्यताम्। सुस्वदितं? सुस्वादितम्। शेषान्नं किं क्रियताम्? इष्टैः सह भुज्यताम्। अपसव्येन पिण्डदानार्थं गोमयेन वेदिकालेपनम्—अपहता असुरा रक्षाꣳसि वेदिषदः, इति कुशेन रेखाकरणम्। उल्मुकधारणम्—ॐ

ये रूपाणि प्रतिमुञ्चमानाः असुराः सन्तः स्वधया चरन्ति परा पुरो निपुरो ये भरंत्यग्निष्टांल्लोकान्प्रणुदात्यस्मात्। अवनेजनं—सतिलमोटक-जलं गृहीत्वा ॐ विष्णुः ३ अद्येह० अमुकगोत्र अस्मत्पितः अमुक-शर्मन् वसुस्वरूप ( अमुकगोत्रे अस्मन्मातः अमुकि देवि वसुस्वरूपे ) अस्मिन्सांवत्सरिक एकोद्दिष्टक्षयाहश्राद्धे पिण्डासने अवनेनिक्ष्व । ततः उपमूलछिन्नकुशास्तरणं सव्येन पदस्मरणम्—

ईशान—विष्णु—कमलासनकार्तिकेयवह्नित्रयार्करजनीशगणेश्वराणाम् ।
क्रौञ्चामरेज्यकलशोद्भवकाश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॥

गङ्गागयादीन् संस्मृत्य गङ्गायै नमः गयायै नमः गदाधराय नमः कुरुक्षेत्राय नमः श्रीतीर्थराजप्रयागाय नमः। पितृस्वरूपं ध्यात्वा भो ब्राह्मणा युष्मदनुज्ञया पिण्डदानम् अहं करिष्ये 'ॐ कुरुष्व' इति विप्रोक्तिः । ततः अपसव्येन तिलमोटकयुतं पिण्डं गृहीत्वा वामजान्वाच्य अद्येह० अमुकगोत्र अस्मत्पितः अमुकशर्मन् वसुस्वरूप ( अमुकगोत्रे अस्मन्मातः अमुकि देवि वसुस्वरूपे ) अस्मिन् सांवत्सरिक एकोद्दिष्टक्षयाहश्राद्धे एषोऽन्नपिण्डो अमृतस्वरूपो मद्दत्तस्तेऽस्तु इयं भूमिर्गयातुल्या इदम् उदकं गाङ्गम्। गङ्गोदके असति गङ्गाजलतुल्यं वा अमुकगोत्राय ( गोत्रायै ) अस्मत्पित्रे ( अस्मन्मात्रे ) अमुकशर्मणे ( अमुकीदेव्यै ) वसुस्वरूपाय ( वसुस्वरूपायै ) आचारात् लेपभागिनाम् अयं भागोऽस्तु इति लेपभागं पिण्डपार्श्वे दद्यात्। पिण्डास्तरण-कुशेषु करोन्मार्जनं कृत्वा हस्तप्रक्षालनम्। सव्येन उदङ्मुखेनैवं अरुं नियमनम् ततः परावृत्य अपसव्येन अमीमदन्त पितरो यथाभागमावृषायिषत। ततः प्रत्यवनेजनम्—अद्येह० अमुकगोत्र अस्मत्पितः अमुकशर्मन् वसुस्वरूप [ अमुकगोत्रे अस्मन्मातः अमुकि देवि वसुस्वरूपे ]

अस्मिन् सांवत्सरिक एकोद्दिष्टक्षयाहश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व। किञ्चित् नीवीविस्रंसनम्। नमो वः इति षडञ्जलिकरणम्, ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वः पितरो देष्मै तद्वः पितरो व्वासः। त्रिगुणितसूत्रदानम्—एतद्वः पितरो वासः आधत्त। ऊर्ज्जकरणं कर्मपात्रोदकेन ॐ ऊर्ज्जं व्वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधास्थ तर्पयत मे पितॄन्। सव्येन देवताभ्य इति त्रिर्जपः। भो ब्राह्मणा युष्मदनुज्ञया पिण्डार्चनमहं करिष्ये 'ॐ कुरुष्व' इति प्रत्युक्तिः। ततः अपसव्येन पिण्डार्चा, पिण्डार्चनविधौ अत्रं नमः गन्धोऽस्तु स्वधा अक्षताः पुष्पाणि तुलसीदलानि।

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन्न पितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम्। वस्त्रं धूपदीपौ नैवेद्यं ताम्बूलं भूषणं च समर्प्य अद्येह० अमुकगोत्र अस्मत्पितः अमुकशर्मन् वसुस्वरूप ( अमुकगोत्रे अस्मन्मातः अमुकि देवि वसुस्वरूपे ) अस्मिन्सांवत्सरिक एकोद्दिष्टक्षयाहश्राद्धे पिण्डार्चनविधौ इमानि गन्धाक्षत—पुष्प-तुलसीदलानि वासो-धूप-दीप-नैवेद्य-ताम्बूल-भूषणानि मदत्तानि ते स्वधा। सव्येन पिण्डार्चनविधेः सर्वं परिपूर्णमस्तु, अस्तु परिपूर्णम्। ततः पिण्डाग्रभूमौ सुप्रोक्षितमस्तु, अस्तु सुप्रोक्षितम्। शिवाः आपः सन्तु विप्रकरे जलदानम्।

अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्।
ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ॥

सौमनस्यमस्तु, अस्तु सौमनस्यम्—

लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ।
लक्ष्मीर्वसते सदा गोष्ठे सौमनस्यं सदाऽस्तु मे ॥

अरिष्टं घ्नन्तु अक्षता:—

अक्षतं चास्तु मे नित्यं शान्तिपुष्टिकरं परम् ।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥

ततः कुशैः कर्मपात्रोदकेन मूर्ध्न्यभिषेकं कुर्यात्, मम कुले दीर्घमायुरस्तु, अस्तु, शान्तिरस्तु, अस्तु, पुष्टिरस्तु अस्तु, वृद्धिरस्तु अस्तु, यच्छ्रेयस्तदस्तु, यत्पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु, अमृताभिषेकोऽस्तु, ततोऽक्षय्योदकदानम्—अक्षय्यं तु विप्रकर एव अपसव्येन । अद्येह० अमुकगोत्रस्य अस्मत्पितुः अमुकशर्म्मणो वसुस्वरूपस्य ( अमुकगोत्रायाः अस्यम्मातुः अमुकीदेव्याः वसुस्वरूपायाः ) अस्मिन् सांवत्सरिक एकोद्दिष्टक्षयाहश्राद्धे इदम् अन्नादिकं यद्दत्तं तदक्षय्यमस्तु, अस्तु अक्षय्यम् । सव्येन प्रार्थना आशीर्ग्रहणम्, अघोराः पितरः सन्तु २, गोत्रन्नो वर्द्धतां, वर्द्धतां, दातारो नोभिवर्द्धन्तां, वर्द्धन्तां, वेदाः वर्द्धन्तां, वर्द्धन्तां, सन्ततिः वर्द्धताम्, वर्द्धताम्, श्रद्धा च नो मा व्यगमत्, मागाः, बहुदेयं च नोऽस्तु, अस्तु, अन्नं च नो बहु भवेत्, भवतु, अतिथींश्च लभेमहि, लभध्वम्, याचितारश्च नः सन्तु, सन्तु, मा याचिष्म कंचन, मा याचेथाः, एता एव आशिषः सत्याः सन्तु, सन्तु । ततः स्वधावाचनं सव्येन—भो ब्राह्मणाः युष्मदनुज्ञया स्वधां वाचयिष्ये, वाच्यताम् । अपसव्येन स्वधावाचनीयान् त्रीन् कुशान् पिण्डोपरि संस्थाप्य तिलमोटकं जलं च गृहीत्वा अद्येह० अमुकगोत्रेभ्योऽस्मत्पितृभ्यः अमुकशर्मभ्यो वसुस्वरूपेभ्यः [ अमुकगोत्राभ्यः अस्मन्मातृभ्यः अमुकीदेवीभ्यः वसुस्वरूपाभ्यः ] अस्मिन्सां-

वत्सरिक एकोद्दिष्टक्षयाहश्राद्धे ब्रह्मन् मधु मधु स्वधोच्यताम्, अस्तु स्वधा। स्वधावाचनीयेष्वपो निषिञ्चति ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधास्थ तर्पयत मे पितॄन्। दुग्धेन आपूर्यकरणम् उत्तानं पात्रं कृत्वा पितरः स्वर्गे लोके प्रस्थिता भवन्तु। सव्येन दक्षिणा-सङ्कल्पः—अद्येह० अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणो वसुस्वरूपस्य ( अमुकगोत्रायाः अस्मन्मातुः अमुकीदेव्याः वसुस्वरूपायाः ) अक्षय-तृप्तिप्राप्त्यर्थं कृतस्य अस्य सांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धस्य साङ्ग-तासिद्ध्यर्थं न्यूनातिरिक्तपरिपूर्त्यर्थमिदं रजतं रजतनिष्क्रयिणीमिमां दक्षिणां वा श्राद्धभोक्तृभ्यो ब्राह्मणेभ्यो ह्यन्येभ्योऽपि विभज्य दातुमहम् उत्सृजे ॐ तत्सन्न मम।

स्वतिलकं—सत्यानुष्ठानसम्पन्नाः सर्वदा यज्ञबुद्धयः।
पितृमातृपराश्चैव सन्त्वस्मत्कुलजा नराः॥

अक्षताः पान्तु स्वस्ति भवन्तो ब्रुवन्तु ॐ 'स्वस्ति' इति विप्रोक्तिः। विशेषपूजा—ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन्न पितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम्।

आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च।
प्रयच्छन्ति तथा राज्यं नृणां प्रीताः पितामहाः॥
आयुः पुत्रान् यशः स्वर्गं कीर्त्तिं पुष्टिं बलं श्रियम्।
पशून् सुखं धनं धान्यं प्राप्नुयां पितृपूजनात्॥

ततोऽपसव्येन पिण्डम् उत्थाप्य सव्येन आघ्राय अपसव्येन पात्रान्तरे निधाय पिण्डस्थाने शङ्खचक्रादिकं लिखित्वा गन्धपुष्पाक्षतैः पूजयेत्। पिण्डस्थाने अत्रं नमः गन्धम् अक्षताः पुष्पाणि। सव्येन तत्र

दीपं संस्थाप्य षड् ऋतून् पूजयेत् । ॐ वसन्ताय नमः ॐ ग्रीष्माय नमः ॐ वर्षाभ्यो नमः ॐ शरदे नमः ॐ हेमन्ताय नमः ॐ शिशिराय नमः । ततो हस्तौ संहतौ कृत्वा—

यान्तु पितृगणाः सर्वे यस्मात्स्थानात् उपागताः ।
सर्वे ते हृष्टमनसः सर्वान् कामान् ददन्तु मे ॥
ये लोका दानशीलानां ये लोकाः पुण्यकर्मणाम् ।
सम्पूर्णान् सर्वभोगैस्तु तान् व्रजध्वं सुपुष्कलान् ॥
इहास्माकं शिवं शान्तिः आयुरारोग्यसम्पदः ।
वृद्धिः सन्तानवर्गस्य जायतामुत्तरोत्तरा ॥

दीपस्थाने दीपः, अपसव्येन पिण्डस्थाने पिण्डः, असङ्करमभ्युदय—

यः कश्चित्पितृरूपेण तिष्ठते परमेश्वरः ।
सोऽयं श्राद्धप्रदानेन तृप्तिमायातु शाश्वतीम् ॥
गयायां पितृरूपेण स्वयमेको जनार्दनः ।
यं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ॥
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
यत्र यत्र स्मरिष्यामि पितॄणां दत्तमक्षयम् ॥
शमीपत्रप्रमाणेन पिण्डं दद्याद् गयाशिरे ।
उद्धरेत्सप्तगोत्राणां कुलमेकोत्तरं शतम् ॥
पितुः शतगुणं पुण्यं सहस्रं मातुरुच्यते ।
भगिन्यां शतसाहस्रं सोदर्ये दत्तमक्षयम् ॥

सव्येन अद्य दिने अपरमपि आमं पक्वं हिरण्यम् उदयास्तमयपर्यन्तं यद्दत्तं यद्दास्ये तत्स्वर्गद्वारे अमृतीभूयते स्वधा ।

देवताभ्यः पितृभ्यश्च महायोगीभ्य एव च ।

नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

इति त्रिः पठित्वा—

सप्तव्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ ।
चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ।
प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥
श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ।

मनसा पितरं ध्यात्वा (मातरं) ततः अपसव्येन— अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणो वसुस्वरूपस्य सांवत्सरिकैकोद्दिष्टक्षयाहश्राद्धं विसृजे । सव्यम् । इदं श्राद्धं मया विधिहीनं देशहीनं कालहीनं वाक्यहीनं श्रद्धाहीनं दक्षिणाहीनं भावनाहीनं यत्कृतं तत्सुकृतमस्तु प्रमादाल्लोभाद्भयाद्वा यन्न कृतं तत् श्रीविष्णोः प्रसादात् ब्राह्मणवचनात् सर्वं परिपूर्णमस्तु, अस्तु परिपूर्णम् । अपसव्येन कुशेन विप्रस्पर्शः उत्तिष्ठेति ब्राह्मणमुत्थापयेत् । ॐ उत्तिष्ठ ब्रह्मणस्पते देवयं तस्त्वे महे उपप्रयन्तु मरुतः स्वधा नमऽइन्द्रप्रशुर्भवासचा इति ब्राह्मणम् उत्थाप्य स्थानान्तरे निधाय अभिरम्यताम् इति विसर्जयेत् । अभिरताः स्मः इति प्रत्युक्तिः । सव्येन कर्मपात्रं गृहीत्वा आमावाजस्येत्यनुव्रज्य प्रदक्षिणीकरणम् । ॐ आमाव्वाजस्य प्रसवो जगम्यादे मे द्यावा पृथिवी विश्वरूपे आमागन्ताम्पितरो मातरो चामा सोमो अमृतत्वेन गम्यात् । इत्यनुव्रज्य प्रदक्षिणीकृत्य नमस्कुर्यात् । कर्मपात्रं विप्रपादाग्रे निनीय अपसव्येन कुशब्राह्मणस्य शिखामोचनं कृत्वा नीवीं विसृज्य पाणिना दीपं निर्वाप्य सव्येन आचम्य—

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मनावानुसृतेः स्वभावात् ।
करोमि यत् यत् सकलं परस्मै नारायणायेति समर्पयामि ॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥
अद्य मे सफलं जन्म अद्य मे सफलं तपः ।
अद्य मे गोत्रजाः सर्वे याता वोऽनुग्रहाद्दिवम् ॥
पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः ।
तत्क्लेशमिह सञ्जातं विस्मृत्य क्षन्तुमर्हथ ॥
सूक्तस्तोत्रजपं त्यक्त्वा पिण्डाघ्राणं च दक्षिणाम् ।
आह्वानं स्वागतं चार्घं विना च परिवेषणम् ॥
विसर्जनं सौमनस्यमाशिषं प्रार्थनं तथा ।
पित्र्यमन्यत् प्रकर्तव्यं प्राचीनावीतिना सदा ॥

इति एकोद्दिष्टश्राद्धविधिः ॥

## ( १० ) अथ पार्वणश्राद्धविधिः ।

तत्र अपराह्णे श्राद्धं, मध्याह्ने स्नानम् । स्तत्रसङ्कल्पः—यवकुशजलान्यादाय ॐ विष्णुः ३ नमः परमात्मने श्रीब्रह्मपुराणपुरुषोत्तमाय अत्र पृथिव्यां जम्बूद्वीपे भरतखण्डे आर्यावर्ते पुण्यक्षेत्रे भारतवर्षैकदेशे [ हिमवत्पर्वतैकदेशे ] ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहनाम्नि कल्पे कृतत्रेताद्वापरान्ते अष्टाविंशतितमे कलियुगे कलियुगस्य प्रथमचरणे

वैवस्वतनाममन्वन्तरे षष्ट्यब्दानां मध्ये अमुकनामसंवत्सरे दक्षिणायने शरदृतौ ( भाद्रश्चेत् वर्षर्तौ ) आश्विनमासे कृष्णपक्षे यथा नाम-नक्षत्र-योग-करण-मुहूर्त-वारान्वितायाम् अमुकवारान्वितायाम् अमुकपुण्यतिथौ अमुकगोत्रोत्पन्नः अमुकराशिः अमुकशर्मा (वर्मा, गुप्तः, दासः ) अहम् [ अपसव्यं कृत्वा ] तिलमोटकसहितं जलं गृहीत्वा अमुकगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणाम् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अक्षयतृप्तिप्राप्तिकामनया पुरूरवोमार्द्रवसंज्ञकविश्वेदेवपूर्वकं सकलपापक्षयार्थं पार्वणश्राद्धविधिना अमुकपार्वणश्राद्धाधिकारसिद्ध्यर्थम् आत्मशुद्ध्यर्थम् मध्याह्नस्नानं करिष्ये 'ॐ कुरुष्व' इति प्रत्युक्तिः । इति सङ्कल्प्य स्नात्वा धौते वाससी परिधाय श्राद्धाङ्गतर्पणं कृत्वा श्राद्धदेशे गत्वा दीपं प्रज्वाल्य आचम्य पवित्रपाणिर्भूत्वा

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ।

इति विष्णुं सम्पूज्य हस्तौ संहतौ कृत्वा—

ॐ यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय ॥

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

इति पुष्पाञ्जलिं दत्त्वा ब्राह्मणान् तैलाभ्यङ्गपूर्वकं मण्डलाद्बहिः संस्थाप्य प्रतिष्ठा ॐ एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे तेन

यज्ञमवतेन यज्ञपतिं तेन मामव मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनो त्वरिष्टं यज्ञँ समिमं दधातु विश्वेदेवासऽइह मादयन्तामोँ ३ म्प्रतिष्ठ ॐ भूर्भुवः स्वः वैश्वदैविककुशब्रह्मन् सुप्रतिष्ठितो भव। एवं पैतृकब्राह्मणादीनामपि ॐ एतन्त इति पठित्वा ॐ भूर्भुवः स्वः पित्रादित्रयश्राद्धसम्बन्धिकुशब्रह्मन् सुप्रतिष्ठितो भव।

कुशोऽसि कुशपुत्रोऽसि ब्रह्मणा निर्मितः पुरा।
त्वय्यर्चिते सोऽर्चितोऽस्तु यस्याहं नाम कीर्तये॥

एवं मातामहब्राह्मणस्यापि प्रतिष्ठा मातामहसंबन्धिकुशब्रह्मन् सुप्रतिष्ठितो भव 'कुशोऽसि कुशपुत्रोऽसि०' इति पठित्वा यवान् गृहीत्वा अद्येहेत्यादि अमुकसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि [ भाद्रे सिंहस्थिते ] अमुकतिथौ अमुकगोत्र–अस्मत्पित्रादित्रयश्राद्धसंबन्धिनाम् अमुकगोत्र–अस्मन्मातामहादित्रयश्राद्धसंबन्धिनां पुरूरवोमाद्रवसंज्ञकानां विश्वेषान्देवानाम् अद्यकर्तव्ये अमुकपार्वणश्राद्धे वैश्वदैविककृत्ये कुशब्रह्मन् त्वं मया निमन्त्रितः 'निमन्त्रितोऽस्मि' इति प्रत्युक्तिः। हस्तौ संहतौ कृत्वा—

अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा॥
सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः।
भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि॥

आगतं वः, सु स्वागतम्। एतद्वः पाद्यमस्तु।

यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे।
तत्फलं पाण्डवश्रेष्ठ विप्राणां पादपूजने॥

ततः अपसव्येन तिलान्गृहीत्वा अद्येह अमुकसंवत्सरे दक्षिणायने

शरदृतौ आश्विनमासे महालयापरपक्षे कन्यागते सवितरि [ भाद्रे सिंहस्थिते सवितरि इति पठेत् ] अमुकतिथौ अमुकगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्य कर्तव्ये अमुकपार्वणश्राद्धे पित्रादित्रयश्राद्धकृत्ये कुशब्रह्मन् त्वं मया निमन्त्रितः, निमन्त्रितोऽस्मि इति प्रत्युक्तिः, बहुत्वे तु भो ब्राह्मणा भवन्तो मया निमन्त्रिताः, निमन्त्रिताः स्मः, अक्रोधनैः शौचपरैः० इति पठित्वा सव्येन आगतं वः, सुस्वागतम्। अपसव्येन एतद्वः पाद्यमस्तु यत्फलं कपिलादाने० इति पठेत्। ततो मातामहानाम् अपसव्यम् अद्येहेत्यादि अमुकगोत्राणाम् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अद्य कर्तव्ये अमुकपार्वणश्राद्धे मातामहादित्रयश्राद्धकृत्ये कुशब्रह्मन् त्वं मया निमन्त्रितः, निमन्त्रितोऽस्मि इति प्रत्युक्तिः। अक्रोधनैः शौचपरै० इति पठित्वा सव्येन आगतं वः, सुस्वागतम्। अपसव्येन एतद्वः पाद्यमस्तु यत्फलं कपिलादाने० इति पठेत्। सव्येन पादार्घं सम्पाद्य गन्धपुष्पाक्षतादि तूष्णीं निक्षिप्य पादार्घपात्रं गृहीत्वा अद्येह अमुकसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकगोत्र अस्मत्पित्रादित्रयश्राद्धसंबन्धिनः अमुकगोत्र अस्मन्मातामहादित्रयश्राद्धसंबन्धिनः पुरूरवोमार्द्रवसंज्ञकविश्वेदेवा अद्य कर्तव्ये अमुकपार्वणश्राद्धे वैश्वदैविक ब्रह्मन् एष ते पादार्घोऽस्तु। ततः पैतृकं कर्म-अपसव्येन पादार्घं सम्पाद्य हस्ते गृहीत्वा अद्येह अमुकसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अमुकतिथौ अमुकगोत्रा अस्मत्पितृपितामहप्रपितामहाः अमुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्यकर्तव्ये अमुकपार्वणश्राद्धे

पित्रादित्रयश्राद्धसंबन्धिकुशब्रह्मन् एष ते पादार्घोऽस्तु अद्येह अमुकसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अमुकतिथौ अमुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्यकर्तव्ये अमुकपार्वणश्राद्धे मातामहादित्रयश्राद्धसम्बन्धिकुशब्रह्मन् एष ते पादार्घोऽस्तु । पादार्घदानाचमनं सव्येन स्वयम् आचम्य विश्वेदेवान् आचामयेत । अपसव्येन पितृब्राह्मणमातामहब्राह्मणान् आचामयेत सव्येन श्राद्धदेशोपवेशनम् ।

ब्रह्मन् उत्तिष्ठ अत्र उपविश्यताम् इति प्राङ्मुखं वैश्वदैविकब्राह्मणम् अपसव्येन उदङ्मुखं पित्रादिब्राह्मणान् उपवेशयेत् । सव्येन कर्मपात्रपूरणं भूमिं स्पृशेत् भूरसि भूमिरसि अदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीं दृᳬंह पृथिवीम्माहिᳬंसीः भूमौ शङ्खचक्रादिकं लिखित्वा आसनम् आसने पात्रं पात्रे पवित्रं—

अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥

पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवउत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः । शन्नोदेवीति जलम्—ॐ शन्नोदेवीरभिष्टयऽ आपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः । ॐ यवोसि यवयास्मद्द्वेषो यवया रातीर्दिवेत्वान्तरिक्षायत्वा पृथिव्यैत्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि इति यवान् क्षिपेत् । ॐ तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान्प्रीणाहि नः स्वाहा गन्धपुष्पाक्षतादि तूष्णीं निक्षिप्य कर्मपात्रं सुसंपन्नमस्तु । अस्तु सुसम्पन्नं, तेन जलेन आत्मानं सम्प्रोक्ष्य श्राद्धसामग्रीं च सम्प्रोक्ष्य प्राणानायम्य ॐ पुण्डरीकाक्षाय नमः ३ ।

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥

हस्तौ संहतौ कृत्वा—

देवताभ्यः पितृभ्यश्च महायोगीभ्य एव च।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

इति त्रिः पठित्वा—

सप्त व्याधा दशार्णेषु मृगाः कालं जरे गिरौ।
चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः।
प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥
श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरम्।

मनसा च पितृन् ध्यात्वाः, ततो अपसव्येन अद्येहेत्यादि० अमुकगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणाम् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अक्षयतृप्तिप्राप्त्यर्थं पुरूरवोमार्द्रवसंज्ञकविश्वेदेवपूर्वकं अमुकपार्वणश्राद्धं समारभे। सव्येन—

पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः।
यत्र यत्र स्मरिष्यामि पितृणां दत्तमक्षयम् ॥

ततः अपसव्येन तिलमोटकं गृहीत्वा वामकक्ष्यां ॐ सोमस्य नीविरसि विष्णोः शर्म्मासि शर्म्म यजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीष्कृधि इति नीवीं बध्वा ततो दिग्बन्धनम् [ दिग्बन्धे सव्यं ] मोटकान् गृहीत्वा

अग्निष्वाताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ।
तथा बर्हिषदः पान्तु याम्यां ये पितरस्तथा ॥
प्रतीचीमाज्यपाः पान्तु उदीचीम् अपि सोमपाः ।
विदिशश्च गणाः सर्वे रक्षन्तूर्द्ध्वमधोऽपि वा ॥
रक्षोभूतपिशाचेभ्यस्तथैव सुरदोषतः ।
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥
तिला रक्षन्तु दितिजाद् दर्भा रक्षन्तु राक्षसात् ।
पंक्तिं वै श्रोत्रियो रक्षेत् अतिथिः सर्वरक्षकः ॥
अत ऊर्द्ध्वं च कोणेषु हविष्मन्तश्च सर्वदा ।

ततः सव्येन साग्रान् कुशान् गृहीत्वा कर्मपात्रस्थं जलमभिलोडयेत् ॐ यद्देवा देवहेडनं देवासश्चकृमा व्वयम् । अग्निर्म्मा तस्मादेनसो विश्वान् मुञ्चत्वꣳहसः । यदि दिवा यदि नक्तमेनाꣳसि चकृमा व्वयम् । व्वायुर्म्मा तस्मादेनसो व्विश्वान्मुञ्चत्वꣳहसः । यदि जाग्रद्यदि स्वप्नऽएनाꣳसि चकृमा व्वयम् । सूर्य्यो मा तस्मादेनसो व्विश्वान्मुञ्चत्वꣳहसः । गायत्र्या च । ततो दर्भतिलयुतं तज्जलं गृहीत्वा पाकपिधानमुत्तार्य शूद्रादिदृष्टिदूषितपाकः पूतोऽस्तु श्राद्धयोग्यो भवतु इति गायत्र्या अन्नं सम्प्रोक्ष्य, अथ प्रतिज्ञा यवकुशजलान्यादाय ॐ विष्णुः ३ नमः परमात्मने श्रीपुराणपुरुषोत्तमाय अत्र पृथिव्यां जम्बूद्वीपे भरतखण्डे आर्यावर्ते पुण्यक्षेत्रे भारतवर्षैकदेशे [ हिमवत्पर्वतैकदेशे ] ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कृतत्रेताद्वापरान्ते कलियुगे कलियुगस्य प्रथमचरणे षष्ट्यब्दानां मध्ये अमुकनामसंवत्सरे दक्षिणायने शरदृतौ ( भाद्रश्चेत् वर्षर्तौ ) आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि [ भाद्रे

सिंहस्थे सवितरि ] अमुकतिथौ अमुकगोत्रोत्पन्नः अमुकराशिः अमुकशर्मा ( वर्मा, गुप्तः, दासः ) अहम् अपसव्यं तिलमोटकं च गृहीत्वा अमुकगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणाम् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अक्षयतृप्तिकामनया पुरूरवोमार्द्रवसंज्ञकविश्वेदेवपूर्वकम् अर्घपिण्डसहितं पक्वान्नेन पार्वणश्राद्धविधिना अमुकपार्वणश्राद्धं करिष्ये 'ॐ कुरुष्व' इति प्रत्युक्तिः। ततः सव्येन आसनं—

समूलेन भवेद्दर्भः पितॄणां श्राद्धकर्मणि।
मूलेन लोकान् जयति शक्रस्य तु महात्मनः॥
तर्पणादीनि कार्याणि पितॄणां यानि कानि च।
तानि स्युः द्विगुणैः दर्भैः सप्तपत्रैः विशेषतः॥

वर्ज्याः कुशाः श्राद्धप्रदीपे—

पिण्डार्थास्तरणे च तर्पणविधौ त्याज्या नियुक्ताः कुशाः
सद्‌गर्भाः शटिता धृताश्च पथि ये भुक्तौ मलोत्सर्जने।
नीवी ब्रह्मगुणोभयस्थितपरे दग्धास्तथावह्निना
दर्भादीन्स्वयमाहरेन्न वृषलानीतैस्तु कार्या क्रिया॥

ऋजुकुशद्वययवानादाय अद्येहेत्यादि अमुकनामसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यागते सवितरि अमुकतिथौ अमुकगोत्र अस्मत्पित्रादित्रयश्राद्धसंबन्धिनां तथा अमुकगोत्र अस्मन्मातामहादित्रयश्राद्धसंबन्धिनां पुरूरवोमार्द्रवसंज्ञकानां विश्वेषां देवानाम् इदमासनमस्तु ॐ भूर्भुवः स्वः इदमासनमास्यताम्। आसामहे। ततः अपसव्येन तिलमोटकं गृहीत्वा पैतृकं कर्म अद्येहेत्यादि अमुकनामसं-

वत्सरे दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अमुकतिथौ अमुकगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अमुकपार्वणश्राद्धे पित्रादित्रयश्राद्धसंबन्धिकुशब्रह्मन् इदमासनमस्तु सव्येन ॐ भूर्भुवः स्वः इदमासनमास्यताम् आसे अपसव्यं पुनः तिलमोटकं गृहीत्वा अद्येह० अमुकगोत्राणाम् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अमुकपार्वणश्राद्धे मातामहादित्रयश्राद्धसम्बन्धिकुशब्रह्मन् इदमासनमस्तु सव्येन ॐ भूर्भुवः स्वः इदमासनमास्यताम् आसे। ततः आवाहनम् सव्यं विधाय कुशाद्वययवान् गृहीत्वा अद्येह० अमुकगोत्रास्मत्पित्रादित्रयश्राद्धसंबन्धिनः तथा अमुकगोत्र अस्मन्मातामहादित्रयश्राद्धसंबन्धिनः पुरूरवोमार्द्रवसंज्ञकान् विश्वेदेवान् आवाहयिष्ये । ॐ आवाहय इति प्रत्युक्तिः। ॐ विश्वेदेवा सऽआगत शृणुतामऽइम ᳪहवम्। एदं बर्हिर्निषीदत इत्यावाह्य प्रदक्षिणं यवान् विकीर्य ॐ विश्वेदेवाः शृणुतेमᳪहवं ये ऽअन्तरिक्षे यऽउपद्यविष्ट येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन् वर्हिषिमादयध्वम् ।

आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ।
ये यत्र विहिता श्राद्धे सावधाना भवन्तु ते ।।

आगच्छत । ततः अपसव्येन पितृनावाहयेत् तिलमोटकं गृहीत्वा अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यागते सवितरि अमुकतिथौ अमुकगोत्रान् अस्मत्पितृपितामहप्रपितामहान् अमुकामुकशर्मणः सपत्नीकान् वसुरुद्रादित्यस्वरूपान् पितृन् आवाहयिष्ये ॐ आवाहय ॐ उशन्तस्त्वानिधीमह्युशन्तः समिधीमहि उशन्नुशत ऽआवह-

पितॄन् हविषेऽअत्तवे । इत्यावाह्य अप्रदक्षिणं तिलानवकीर्य आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु ते ब्रुवन्त्वस्मान् ।

ये मया मन्त्रिताः पूर्वं पितरः पितृपक्षगाः ।
आश्रुत्य पितृकार्येषु सावधाना भवन्तु ते ॥

आगच्छन्तु इति जपेत्, मातामहानावाहयेत्, अपसव्येन तिलमोटकं गृहीत्वा अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यागते सवितरि अमुकतिथौ अमुकगोत्रान् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहान् अमुकामुकशर्मणः सपत्नीकान् वसुरुद्रादित्यस्वरूपान् आवाहयिष्ये ॐ आवाहय । उशन्तस्त्वेनावाह्याऽप्रदक्षिणं तिलानवकीर्य आयन्तु न० इति जपेत, आगच्छन्तु० । ततः सव्येन हस्तार्घस्थापनं देवाग्रे द्वौ एकं वा । ततो भूमौ शङ्खचक्रादिकं लिखित्वा आसनं आसने पात्रं पात्रे पवित्रं पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्म्यच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मिभिः इति पवित्रं निक्षिपेत । ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः इति जलं, यवोसीति यवान्, गन्धपुष्पाक्षतादि तूष्णीं प्रणवेन वा निक्षिप्य एवं रीत्या त्रीणि पित्र्यर्घपात्राणि त्रीणि मातामहार्घपात्राणि आसनं आसने पात्रं पात्रे पवित्रं पवित्रेस्थो वैष्णव्यौ० इति शन्नोदेवीति जलं, तिलोसीति तिलान्, गन्धपुष्पाक्षतादि तूष्णीं प्रणवेन वा निक्षिप्य ततो भो ब्राह्मणा देवार्घपात्रे परिपूर्णे स्ताम् परिपूर्णे स्ताम् इति प्रत्युक्तिः एकार्घे देवार्घपात्रं परिपूर्णमस्तु अस्तु परिपूर्णम् । एवं रीत्या पित्रादीनामपि पित्र्यर्घ्यपात्राणि परिपूर्णानि 'सन्तु' इति प्रत्युक्तिः तथा मातामहार्घ्यपात्राणि परिपूर्णानि सन्तु, सन्तु । ततः

सव्यं विधाय पवित्रं गृहीत्वा विप्रहस्ते समर्प्य सपवित्रेषु हस्तेषु, ॐ या दिव्याऽआपः पयसा संबभूवुर्याऽअन्तरिक्षाऽउत पार्थवीयाः हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाःशᳪस्योनाः सुहवा भवन्तु। अद्येह अमुकसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यागते सवितरि अमुकतिथौ अमुकगोत्रास्मत्पित्रादित्रयश्राद्धसम्बन्धिनः तथा अमुकगोत्रास्मन्मातामहादित्रयश्राद्धसम्बन्धिनः पुरूरवोमार्द्रवसंज्ञकविश्वेदेवा अमुकपार्वणश्राद्धे एष वो हस्तार्घोऽस्तु, पुनः प्रत्यर्घं च। पैतृकं कर्म सव्येन। सपवित्रेषु हस्तेषु या दिव्या० इति पठित्वा अपसव्येन अर्घ्यपात्रं गृहीत्वा अद्येह अमुकगोत्र **अस्मत्पितः** अमुक शर्मन् सपत्नीक **वसुस्वरूप** अमुकपार्वणश्राद्धे एष ते हस्तार्घोस्तु सव्यं विधाय पुनः प्रत्यर्घं च। सपवित्रेषु हस्तेषु या दिव्या० इति पठित्वा अपसव्यं विधाय अर्घ्यपात्रं गृहीत्वा अद्येह अमुकगोत्र **अस्मत्पितामह** अमुकशर्मन् सपत्नीक **रुद्रस्वरूप** अमुकपार्वणश्राद्धे एष ते हस्तार्घोऽस्तु सव्येन पुनः प्रत्यर्घं च। पुनः सपवित्रेषु हस्तेषु या दिव्या० इति पठित्वा अपसव्येन अर्घ्यपात्रं गृहीत्वा अद्येह अमुकगोत्र **अस्मत्प्रपितामह** अमुकशर्मन् सपत्नीक **आदित्यस्वरूप** अमुकपार्वणश्राद्धे एष ते हस्तार्घोस्तु सव्येन पुनः प्रत्यर्घं च। सपवित्रेषु हस्तेषु या दिव्या इति पठित्वा अपसव्येन हस्तार्घपात्रं गृहीत्वा अद्येह अमुकगोत्र **अस्मन्मातामह** अमुकशर्मन् सपत्नीक **वसुस्वरूप** अमुकपार्वणश्राद्धे एष ते हस्तार्घोस्तु सव्येन पुनः प्रत्यर्घं च। सपवित्रेषु हस्तेषु या दिव्या० इति पठित्वा अपसव्येन हस्तार्घपात्रं गृहीत्वा अद्येह अमुकगोत्र **अस्मत्प्रमातामह** अमुकशर्मन् सपत्नीक **रुद्रस्वरूप** अमुकपार्वणश्राद्धे एष ते हस्तार्घोस्तु सव्येन पुनः प्रत्यर्घं च। सपवित्रेषु हस्तेषु या दिव्या इति पठित्वा

अपसव्येन हस्तार्घपात्रं गृहीत्वा अद्येह अमुकगोत्र **अस्मद्वृद्धप्रमातामह** अमुकशर्मन् सपत्नीक **आदित्यस्वरूप** अमुकपार्वणश्राद्धे एष ते हस्तार्घोऽस्तु सव्येन पुनः प्रत्यर्घं च। ततः सर्वान् संश्रवान् प्रथमे पितृपात्रे समवनीय

अर्घोदकं श्रियं दद्यात् पुत्रपौत्रादिवर्धनम्।
यस्मात्तस्माच्छिवं मे स्यात् इह लोके परत्र च॥

इति मूर्ध्नि अभिषिच्य अपसव्येन पितृवामभागे कुशानास्तीर्य तदुपरि सपवित्रं पित्रर्घपात्रं मातामहार्घपात्रं च पितृभ्यः स्थानमसि इति न्युब्जं कृत्वा तदुपरि स्वधावाचनीयान् सपवित्रान् त्रीन् कुशान् दक्षिणाग्रान् संस्थाप्य आचारात् ॐ शुन्धन्तांल्लोकाः पितृषदनाः पितृषदनमसि इति सम्प्रोक्ष्य पितृभ्यः स्वधायिभ्यः० इति पूजनं ततोऽङ्गुष्ठपवित्रे त्यक्त्वा सव्येन पूजनं विश्वेषां देवानामर्चनविधौ अत्रं नमः इति विश्वेदेवब्राह्मणहस्ते जलं दत्त्वा

ॐ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः॥

अनेन गन्धादिभिः पूजनं गन्धोऽस्तु स्वाहा यवाः पुष्पाणि तुलसीदलानि। अपसव्येन पितॄणां सम्बन्धिकुशविप्रस्य अर्चनविधौ अत्रं नमः ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अक्षन्न पितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धद्ध्वम्, अनेन पितॄणां पूजनं नमो वः पितरो रसाय० इति मातामहानां श्राद्धसंबन्धिकुशविप्रार्चनविधौ अत्रं नमः शेषं पूर्ववत् गन्धोस्तु स्वधा। अक्षताः पुष्पाणि तुलसीदलानि धूपदीपौ। पुनः पवित्रे करे कृत्वा सव्येन यवकुशजलानिगृहीत्वा अद्येह

अमुकगोत्रास्मत्पित्रादित्रयश्राद्धसंबन्धिनः तथा अमुकगोत्रास्मन्मातामहादित्रयश्राद्धसम्बन्धिनः अमुकपार्वणश्राद्धे पुरूरवोमाद्रवसंज्ञकविश्वदेवार्चनविधौ इमानि गन्धाक्षतपुष्पतुलसीदलधूपदीपवासोभूषणादीनि दत्तानि यथाविभागं वः स्वधा विश्वदेवसंबन्धिकुशविप्रार्चनविधेः सर्वं परिपूर्णमस्तु अस्तु परिपूर्णम् । ततः अपसव्येन तिलमोटकयुतं जलं गृहीत्वा अद्येह अमुकगोत्राः अस्मत्पितृपितामहप्रपितामहाः अमुकामुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अमुकपार्वणश्राद्धे कुशविप्रार्चनविधौ इमानि जलगन्धाक्षतपुष्पतुलसीदलधूपदीपवासोभूषणादीनि मद्दत्तानि यथाविभागं विभज्य वः स्वधा। पुनः तिलमोटकसहितं जलं गृहीत्वा अद्येह अमुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अमुकपार्वणश्राद्धे कुशविप्रार्चनविधौ इमानि जलगन्धाक्षतपुष्पतुलसीदलधूपदीपवासोभूषणादीनि मद्दत्तानि यथाविभागं वः स्वधा । विप्रार्चनविधेः सर्वं परिपूर्णमस्तु अस्तु परिपूर्णम् गन्धादिदानाचमनं सव्येन स्वयमाचम्य विश्वेदेवब्राह्मणमाचामयेत् । अपसव्येन पित्रादिब्राह्मणान् आचामयेत् , मातामहादिब्राह्मणानपि आचामयेत् । सव्येन अच्युतस्मरणं ततः—

यथा चक्रायुधो विष्णुः त्रैलोक्यं परिरक्षति ।
एवं मण्डलमस्माकं सर्वभूतानि रक्षतु ॥

इति विश्वेदेवब्राह्मणसमीपे, अपसव्येन पितृमातामहब्राह्मणसमीपे भस्मना मण्डले कार्ये । भस्मना चतुष्कोणमण्डलानि विधाय तेषामुपरि भोजनपात्राणि संस्थाप्य घृताक्तमन्नं पिहितमादाय उद्धृत्य सम्प्रोक्ष्य पृच्छति भो ब्राह्मणा युष्मदनुज्ञया जले अग्नौकरणमहं करिष्ये ॐ कुरुष्व

इति प्रत्युक्तिः विप्रपाणौ जले वाऽग्नौकरणहोमः अपसव्येन तिलमोदक-युतमन्नं गृहीत्वा ॐ अग्नये कव्यवाहनाय स्वाहा इदमग्नये कव्यवाहनाय ॐ सोमाय पितृमते स्वाहा इदं सोमाय पितृमते किञ्चिद्धुतशेषं पित्रादिब्राह्मणेभ्यो दत्त्वा शेषं पिण्डार्थे स्थापयेत्।

ततः सव्येन परिवेषणम्। प्रथमं विष्णवे नैवेद्यं ॐ नाभ्या ऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा-लोकां २॥ अकल्पयन् विष्णो साङ्ग सपरिवार सवाहन इदमन्नस्वरूपं नैवेद्यं गृहाण स्वाहा इति निवेद्य ततो वैश्वदैविकपूर्वकं सुशीतलजल-सहितोष्णान्नपरिवेषणं रजतादिपात्रेषु कुर्यात्। गायत्र्या अन्नं सम्प्रोक्ष्य अन्वाचितदक्षजानुः स्वस्तिकाकृतिनाऽधोमुखेन वामोपरि-स्थितेन दक्षिणहस्तेन मधु मधु मधु इति पात्रमालभ्य जपति पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृतेऽमृतं जुहोमि विष्णो हव्य ꣳरक्ष इति। प्रादक्षिण्येन यवान्विकीर्य अपहताऽअसुरा रक्षाꣳसि वेदिषदः। अङ्गुष्ठग्रहणं ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाꣳसुरे इदमन्नं इमा आपः इदमाज्यम् इदं शाकादिकं सर्वं हविः अद्येह अमुकसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यागते सवितरि अमुकतिथौ अमुकगोत्र अस्मत्पि-त्रादित्रयश्राद्धसंबन्धिभ्यः तथा अमुकगोत्रास्मन्मातामहादित्रयश्राद्ध-संबन्धिभ्यः पुरूरवोमाद्रवसञ्ज्ञकेभ्यो विश्वेभ्यो देवेभ्योऽस्मिन् अमुक-पार्वणश्राद्धे इदमन्नम् इमा आपः इदमाज्यम् इदं शाकादिकं यत्परिविष्टं यत्परिवेक्ष्यमाणं ब्राह्मणस्य आतृप्तिपर्यन्तममृतस्वरूपं मद्दत्तं यथाविभागं वः स्वधा इति भूमौ जलं प्रदद्यात्। ब्राह्मणहस्तदाने प्रत्यवायः। ॐ ये देवासो दिव्येकादशस्थ पृथिव्यामध्येकादशस्थ अप्सु क्षितौ

महिन्नैकादशस्थ ते देवासो यज्ञमिमं जुषध्वम् इति पठित्वा विप्रहस्ते जलमर्पयेत् नमो देवेभ्यः । तथा गायत्र्या अन्नं सम्प्रोक्ष्य अपसव्यं कृत्वा अन्वाचितवामजानुः स्वस्तिकाकृतिना ऊर्ध्वमुखेन दक्षिणोपरि स्थितेन वामहस्तेन ॐ मधु मधु मधु इति पात्रमालभ्य जपति पृथ्वी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि विष्णो कव्यᳪं रक्ष । अप्रादक्षिण्येन तिलान्विकीर्य अपहता ऽअसुरा रक्षाᳪंसि व्वेदिषदः । अङ्गुष्ठग्रहणं इदं विष्णु० इति पठित्वा इदमन्नम् इमा आपः इदमाज्यम् इदं शाकादिकं सर्वं कव्यम् अद्येह अस्मद्गोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यः अमुकामुकशर्मभ्यः सपत्नीकेभ्यः वसुरुद्रादित्यस्वरूपेभ्यः अमुकपार्वणश्राद्धे इदमन्नम् इमा आपः इदमाज्यम् इदं शाकादिकं यत्परिविष्टं यत्परिवेक्ष्यमाणं ब्राह्मणस्य आतृप्तिपर्यन्तं ब्राह्मणेभ्यः आतृप्ति दास्यमानमन्नं च अमृतस्वरूपं मद्दत्तं यथाविभागं वः स्वधा । ॐ ये चेह पितरो ये चने ह्यांश्च विद्मयां २॥ ऽउचनप्रविद्म त्वं व्वेत्थ यतिते जातवेदः स्वधाभिः यज्ञᳪं सुकृतं जुषस्व । इति पितृब्राह्मणहस्ते अपोशानं दत्त्वा

अपोशानं वामभागे सुरापानसमं भवेत् ।
दक्षभागे तु यः कुर्यात सोमपानफलं लभेत् ॥

पुनः मातामहपात्रे उत्तानाभ्यां पाणिभ्यां मधु मधु मधु इति पात्रमालभ्य जपति पृथिवी ते पात्रमिति विष्णो कव्यᳪं रक्ष इति अप्रादक्षिण्येन तिलान्विकीर्य अपहता ऽअसुरा रक्षाᳪंसि व्वेदिषदः । अङ्गुष्ठग्रहणम् इदं विष्णुर्विचक्रमे० इति पठित्वा इदमन्नम् इमा आपः इदमाज्यम् इदं शाकादिकं सर्वं कव्यं पुनः तिलमोदकं गृहीत्वा अद्येह अमुकगोत्रेभ्यः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्यः अमुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्यः अमुकपार्वणश्राद्धे इदमन्नं

इमा आप इदमाज्यम् इदं शाकादिकं यत्परिविष्टं यत्परिवेद्यमाणं ब्राह्मणस्यातृप्तिपर्यन्तं ब्राह्मणेभ्यः आतृप्ति दास्यमानमन्नं च अमृतस्वरूपं मद्दत्तं यथाविभागं वः स्वधा । ये चेह पितर० इति पठित्वा मातामहब्राह्मणहस्ते अपोशानं दत्त्वा यथासुखेन भुङ्ध्वम् इत्याज्ञां दद्यात् भुञ्ज्महे इति विप्रोक्तिः। ततः सव्येन प्रणवव्याहृतिपूर्वकं गायत्रींमधुमतीं ऋक्त्रयं च पठेत्। ॐ मधु मधु मधु ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः मधु नक्तमुतोपसो मधुमत्पार्थिवᳬरजः मधुद्यौरस्तु नः पिता मधुमान्नो व्वनस्पतिर्म्मधु मां २॥ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः ॐ मधु ३ यथाशक्त्या पितृसूक्तम् आशुः शिशान इत्यादि सप्तदशार्चो रुचिस्तवादीनश्नत्सु विप्रेषु पठेत्। ततः तुलसीशर्करागव्यदुग्धाज्यमधुतिलगंगाजलयुतमन्नं ताम्रपात्रे कृत्वा कर्मपात्रोदकं विष्णुनिवेदितभक्तम् अग्नौकरणान्नशेषमपि दत्त्वा अपसव्येन पिण्डान्निर्माय विकिरदानं नैर्ऋत्यांदिशि कुशत्रयं भूमौ क्षिप्त्वा

आसनं—असंस्कृतप्रमीतानां त्यागिनां कुलभागिनाम्।
उच्छिष्टभागधेयानां दर्भेषु विकिरासनम्॥

इत्यासनं दत्त्वा सजलतिलमोटकयुतमन्नं विकिरेत्।

अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥
येषान्न पचते माता येषान्न पचते पिता।
उच्छिष्टं ये च कांक्षन्ति तेभ्योऽन्नं दत्तमक्षयम्॥

उच्छिष्टभागधेयेभ्यो नमः इति गन्धाक्षतपुष्पैः पूजनम् अङ्गुष्ठपवित्रे त्यक्त्वा हस्तौ पादौ प्रक्षाल्य सव्येन आचम्य ततः श्राद्धदेशम्

आगत्य अन्ये अङ्गुष्ठपवित्रे करे कृत्वाऽऽचामेत् । अपसव्येन पितृपूर्वं सकृत्सकृदपो दत्त्वा सव्येन विश्वेदेवब्राह्मणहस्तेऽपि चुलुकदानं पूर्ववद्-गायत्रीं मधुमतीं मध्विति जपित्वा भो ब्राह्मण अस्मिन्पाकमध्ये यत्किञ्चिद्रोचते तत्प्रतिगृह्यताम् तृप्ताः स्थ तृप्ताःस्मः शेषान्नेन किं क्रियताम् इष्टैः सह भुज्यताम् । अपसव्येन पिण्डदानार्थवेदिकालेपनं गोमयेन अपहता इति रेखाकरणं कुशेन ॐ अपहताऽअसुरा रक्षाᳬंसि वेदिषदः । उल्मुकधारणम् ॐ ये रूपाणि प्रतिमुञ्चमानाऽअसुराः सन्तः स्वधया चरन्ति परा पुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् । सतिलजलमोटकं गृहीत्वा अद्येह अमुकसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यागते सवितरि अमुकतिथौ अमुकगोत्र अस्मत्पितः अमुकशर्मन् सपत्नीक वसुस्वरूप अमुकपार्वणश्राद्धे पिण्डासने अवनेनिक्ष्व, अद्येह अमुकगोत्र अस्मत्पितामह अमुकशर्मन् सपत्नीक रुद्रस्वरूप अमुकपार्वणश्राद्धे पिण्डासने अवनेनिक्ष्व, अद्येह अमुकगोत्र अस्मत्प्रपितामह अमुकशर्मन् सपत्नीक आदित्यस्वरूप अमुकपार्वणश्राद्धे पिण्डासने अवनेनिक्ष्व । ततः

उपमूललूनकुशास्तरणं सव्येन पदस्मरणम्—

ईशानविष्णुकमलासनकार्त्तिकेयवह्नित्रयार्करजनीशगणेश्वराणाम् ।
क्रौञ्चामरेज्यकलशोद्भवकाश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॥

गङ्गागयागदाधरादीन् संस्मृत्य ॐ गङ्गायै ॐ गयायै नमः ॐ गदाधरायनमः ॐ कुरुक्षेत्राय नमः ॐ श्रीतीर्थराजाय प्रयागाय नमः पितृस्वरूपं ध्यात्वा भो ब्राह्मणा युष्मदनुज्ञया पिण्डदानमहं करिष्ये ॐ कुरुष्व इति प्रत्युक्तिः । ततः अपसव्येन तिलमोटकयुतं सजलं पिण्डं गृहीत्वा वामजान्वन्वाच्य अद्येह दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे

कन्यागते सवितरि अमुकतिथौ अमुकगोत्र अस्मत्पितः अमुकशर्मन् सपत्नीक वसुस्वरूप अमुकपार्वणश्राद्धे एषोऽन्नपिण्डोऽमृतस्वरूपो मदत्तस्तेऽस्तु इयं भूमिर्गयातुल्या इदमुदकं गाङ्गं गङ्गोदके असति गङ्गाजलतुल्यं वा अमुकगोत्राय अस्मत्पित्रे अमुकशर्मणे सपत्नीकाय वसुस्वरूपाय। अद्येह अमुकगोत्र अस्मत्पितामह अमुकशर्मन् सपत्नीक रुद्रस्वरूप अमुकपार्वणश्राद्धे एषोऽन्नपिण्डः अमृतस्वरूपो मदत्तस्तेऽस्तु, इयं भूमिर्गयातुल्या इदमुदकं गाङ्गं गङ्गाजलतुल्यं वा अमुकगोत्राय अस्मत्पितामहाय अमुकशर्म्मणे सपत्नीकाय रुद्रस्वरूपाय। अद्येह अमुकगोत्र अस्मत्प्रपितामह अमुकशर्मन् सपत्नीक आदित्यस्वरूप अमुकपार्वणश्राद्धे एषोऽन्नपिण्डः अमृतस्वरूपो मदत्तस्तेऽस्तु, इयं भूमिः गयातुल्या इदमुदकं गाङ्गं गङ्गाजलतुल्यं वा अमुकगोत्राय अस्मत् प्रपितामहाय अमुकशर्मणे सपत्नीकाय आदित्यस्वरूपाय। अद्येह अमुकगोत्र अस्मन्मातामह अमुकशर्मन् सपत्नीक वसुस्वरूप अमुकपार्वणश्राद्धे एषोऽन्नपिण्डः अमृतस्वरूपः मदत्तस्तेऽस्तु, इयं भूमिः गयातुल्या इदम् उदकं गाङ्गं गङ्गाजलतुल्यं वा अमुकगोत्राय अस्मन्मातामहाय अमुकशर्मणे सपत्नीकाय वसुस्वरूपाय। अद्येह अमुकगोत्र अस्मत्प्रमातामह अमुकशर्मन् सपत्नीक रुद्रस्वरूप अमुकपार्वणश्राद्धे एषोऽन्नपिण्डः अमृतस्वरूपो मदत्तस्तेऽस्तु इयं भूमिर्गयातुल्या इदमुदकं गाङ्गं गङ्गाजलतुल्यं वा अमुकगोत्राय अस्मत्प्रमातामहाय अमुकशर्मणे सपत्नीकाय रुद्रस्वरूपाय। अद्येह अमुकगोत्र अस्मद्वृद्धप्रमातामह अमुकशर्मन् सपत्नीक आदित्यस्वरूप अमुकपार्वणश्राद्धे एषोऽन्नपिण्डः अमृतस्वरूपो मदत्तस्तेऽस्तु इयं भूमिर्गयातुल्या इदमुदकं गाङ्गं गङ्गाजलतुल्यं वा अमुकगोत्राय अस्मद्वृद्धप्रमातामहाय अमुकशर्म्मणे सपत्नीकाय आदित्यस्वरूपाय। लेपभागिनाम् अयं भागोऽस्तु

इति लेपभागं पिण्डपार्श्वे दद्यात् प्रतिपिण्डं प्रतिवर्गं वा कुलाचारात् पिण्डास्तरणकुशेषु करोन्मार्जनं कृत्वा हस्तप्रक्षालनं सव्येन पिण्डदाना-चमनं करे पुष्पाणि संगृह्य उदङ्मुखेन अपसव्येन अत्र पितर० इति जपः ॐ अत्र पितरोमादयध्वम् यथाभागमावृषायद्ध्वम् । उदङ्मुखेन सव्येन मरुतं नियमयन् ततः परावृत्य अपसव्येन ॐ अमीमदन्त पितरो यथाभागमावृषायिषत पिण्डोपरि पुष्पं दत्त्वा ततः प्रत्यवनेजनम् अद्येह अमुकनामसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे कृष्णपक्षे कन्यागते सवितरि महालयापरपक्षे अमुकतिथौ अमुकगोत्र **अस्मत्पितः** अमुकशर्मन् सपत्नीक **वसुस्वरूप** अमुकपार्वणश्राद्धे पिण्डे प्रत्यवने-निक्ष्व । अद्येह अमुकगोत्र अस्मत्**प्रपितामह** अमुकशर्मन् सपत्नीक **रुद्रस्वरूप** अमुकपार्वणश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व । अद्येह अमुकगोत्र अस्मत्प्रपितामह अमुकशर्मन् सपत्नीक आदित्यस्वरूप अमुकपार्वणश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व । अद्येह अमुकगोत्र अस्मन्मातामह अमुकशर्मन् सपत्नीक वसुस्वरूप अमुकपार्वणश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व । अद्येह अमुकगोत्र अस्मत्प्रमातामह अमुकशर्मन् सपत्नीक रुद्रस्वरूप अमुक-पार्वणश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व । अद्येह अमुकगोत्र अस्मद्वृद्ध-प्रमातामह अमुकशर्मन् सपत्नीक आदित्यस्वरूप अमुकपार्वणश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व किञ्चिन्नीवीविस्रंसनम् ।

नमोवः० इति षडञ्जलिकरणम् । ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरो नमो वो गृहान्न पितरो दत्त सतो वः पितरो देष्मै तद्वः पितरो व्वासः। सूत्रदानं—एतद्वः पितरो वास इति। ऊर्ज्जकरणं कर्मपात्रोदकेन

ॐ ऊर्ज्जं व्वहन्तीरमृतं घृतं पयः कीलालं परिश्रुतम् स्वधास्थ तर्पयत मे पितॄन् । सव्येन देवताभ्य० इति त्रिर्जपः भो ब्राह्मणा युष्मदनुज्ञया पिण्डार्चनमहं करिष्ये ॐ कुरुष्व । अपसव्येन पिण्डार्चनविधौ अत्रं नमः गन्धोऽस्तु स्वधा अक्षताः पुष्पाणि तुलसीदलानि ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अक्षन्नपितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धद्ध्वम् । वस्त्रं धूपं दीपं नैवेद्यं ताम्बूलं भूषणं च समर्प्य तिलमोटकं जलं च गृहीत्वा अद्येह अमुकगोत्राः अस्मत्पितृपितामहप्रपितामहा अमुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः तथा अमुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः पिण्डार्चनविधौ इमानि गन्धाक्षतपुष्पतुलसीदलवासोधूपदीपनैवेद्यताम्बूलभूषणानि तुलसीपत्राणि च मदत्तानि यथाविभागं वः स्वधा पिण्डार्चनविधेः सर्वं परिपूर्णमस्तु अस्तु परिपूर्णम्। सव्येन पिण्डाग्रभूमौ सुप्रोक्षितमस्तु अस्तु सुप्रोक्षितम्। शिवा आपः सन्तु, सन्तु, विप्रकरे जलम्।

अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् ।
ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु ते ।
सौमनस्यमस्तु अस्तु सौमनस्यम् ।
लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ।
लक्ष्मीर्वस्ते सदागोष्ठे सौमनस्यं सदास्तु मे ॥

अक्षताश्चारिष्टं घ्नन्तु ।

अक्षतं चास्तु मे नित्यं शान्तिपुष्टिकरं परम् ।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥

ततः कुशैः कर्मपात्रोदकेन मूर्द्धाभिषेकं कुर्यात । मम कुले दीर्घमायुरस्तु अस्तु, शान्तिरस्तु अस्तु पुष्टिरस्तु अस्तु वृद्धिरस्तु अस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगः शोको दुःखं दारिद्र्यं तत् प्रतिहतमस्तु अमृताभिषेकोऽस्तु ततोऽक्षय्योदकदानम्—अक्षय्यं तु विप्रकर एव । अपसव्येन तिलमोटकसहितं जलं गृहीत्वा अद्येह अमुकसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यागते सवितरि अमुकतिथौ अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणः सपत्नीकस्य वसुस्वरूपस्य अमुकपार्वणश्राद्धे इदमन्नोदकादिकं मद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम् । अद्येह अमुकगोत्रस्य **अस्मत्पितामह**स्य० **रुद्रस्वरूपस्य** अमुकपार्वणश्राद्धे इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तुअक्षय्यम् । अद्येह० अमुकगोत्रस्य **अस्मत्प्रपितामहस्य** अमुकशर्मणः सपत्नीकस्य **आदित्यस्वरूपस्य** अमुकपार्वणश्राद्धे इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम् । अद्येह अमुकगोत्रस्य **अस्मन्मातामहस्य** अमुकशर्मणः सपत्नीकस्य **वसुस्वरूपस्य** अमुकपार्वणश्राद्धे इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम् । अद्येह अमुकगोत्रस्य अस्मत्प्रमातामहस्य अमुकशर्मणः सपत्नीकस्य **रुद्रस्वरूपस्य** अमुकपार्वणश्राद्धे इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम् । सव्येन यवकुशजलमादाय अद्येह अमुकगोत्रास्मत्पित्रादित्रयश्राद्धसंबन्धिनां तथा अमुकगोत्रास्मन्मातामहादित्रयश्राद्धसंबन्धिनां पुरूरवोमाद्रवसंज्ञकानां विश्वेषां देवानामस्मिन् अमुकपार्वणश्राद्धे दैविककृत्ये इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम् । ततः प्रार्थनाशीर्ग्रहणम् ।

अघोराः पितरः सन्तु सन्तु गोत्रन्नो वर्द्धताम् वर्द्धताम् दातारो

नोऽभिवर्द्धन्ताम् वर्द्धन्ताम् वेदाः वर्द्धन्ताम् वर्द्धन्ताम् सन्ततिर्वर्द्धताम् वर्द्धताम् श्रद्धा च नो मा व्यगमत् मागाः बहुदेयं च नोऽस्तु अस्तु अन्नं च नो बहु भवेत्, भवतु, अतिथींश्च लभेमहि लभध्वम् याचितारस्तु नः सन्तु सन्तु मास्मयाचिष्म कञ्चन मा याचेथाः एता एव आशिषः सत्याः सन्तु सन्तु। ततः स्वधावाचनम्। भो ब्राह्मणा युष्मदनुज्ञया स्वधा वाचयिष्ये वाच्यताम् अपसव्येन स्वधावाचनीयान् त्रीन् कुशान् पिण्डोपरि संस्थाप्य सजलतिलमोटकं गृहीत्वा अद्येह अमुकनामसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यागते सवितरि अमुकतिथौ अमुकगोत्रेभ्योऽस्मत्पितृभ्यः अमुकशर्मभ्यः सपत्नीकेभ्यो **वसुस्वरूपेभ्यः** अमुकपार्वणश्राद्धे ब्राह्मणा मधु मधु स्वधोच्यताम् अस्तु स्वधा। अद्येह अमुकगोत्रेभ्यः **अस्मत्पितामहेभ्यः** अमुकशर्मभ्यः सपत्नीकेभ्यो **रुद्रस्वरूपेभ्यः** अमुकपार्वणश्राद्धे ब्राह्मणा मधु मधु स्वधोच्यताम्। अस्तु स्वधा। अद्येह अमुकगोत्रेभ्यः **अस्मत्प्रपितामहेभ्यः** अमुकशर्मभ्यः सपत्नीकेभ्यः **आदित्यस्वरूपेभ्यः** अमुकपार्वणश्राद्धे ब्राह्मणा मधु मधु स्वधोच्यताम् अस्तु स्वधा। अद्येह अमुकगोत्रेभ्यः **अस्मन्मातामहेभ्यः** अमुकशर्मभ्यः सपत्नीकेभ्यो **वसुस्वरूपेभ्यः** अमुकपार्वणश्राद्धे ब्राह्मणा मधु मधु स्वधोच्यताम्, अस्तु स्वधा। अद्येह अमुकगोत्रेभ्योऽस्मत्प्रमातामहेभ्यः अमुकशर्मभ्यः सपत्नीकेभ्यः **रुद्रस्वरूपेभ्यः** अमुकपार्वणश्राद्धे ब्राह्मणा मधु मधु स्वधोच्यताम् अस्तु स्वधा। स्वधा वाचनीयेष्वपो निषिञ्चति ॐ ऊर्जंवहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधास्थ तर्पयत मे पितॄन्। दुग्धेनाप्यूर्जकरणम् आचारात् केचिन्मते नीराजनम्। उत्तानं पात्रं कृत्वा पितरः स्वर्गे लोके प्रस्थिता भवन्तु। सव्येन दक्षिणासङ्कल्पः देयद्रव्यं सम्प्रोक्ष्य पूजनं कार्यम्।

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

अद्येह अमुकसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकगोत्रोत्पन्नः अमुकराशिः अमुकशर्माऽहम् अमुकगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसु-रुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणाम् अस्मन्—मातामहप्रमातामह—वृद्धप्रमातामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अक्षय्यतृप्तिप्राप्त्यर्थं पुरूरवोमार्द्रवसंज्ञकविश्वेदेवपूर्वकं कृतस्यास्य अमुक-पार्वणश्राद्धकर्मणः साद्गुण्यार्थम् इदं रजतं सोमदैवतं रजतनिष्क्रयिणीं दक्षिणां वा श्राद्धभोक्तृभ्यो ब्राह्मणेभ्योऽन्येभ्योपि दातुमुत्सृजे । ॐ तत्सन्न मम । पुनः सुवर्णं सम्प्रोक्ष्य

हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

इति सम्पूज्य यवकुशानादाय अद्येह अमुकगोत्र—अस्मत्पित्रादि-त्रयश्राद्धसंबन्धिनां तथा अमुकगोत्र—अस्मन्मातामहादित्रयश्राद्ध-संबन्धिनां पुरूरवोमार्द्रवसंज्ञकानां विश्वेषां देवानां प्रीतये वैश्वदैविक-कर्मणः साद्गुण्यार्थम् इदं सुवर्णम् अग्निदैवतं मनसोद्दिष्टां दक्षिणां वा ब्राह्मणेभ्यो दातुमुत्सृजे ॐ तत्सन्न मम, स्वस्ति भवन्तो ब्रुवन्तु 'ॐ स्वस्ति' इति विप्रोक्तिः । विश्वेदेवाः प्रीयन्ताम् इति ब्रूहि विश्वेदेव-ब्राह्मणाध्येषणा प्रीयन्तां वो विश्वेदेवाः । स्वतिलकं—

सत्यानुष्ठानसम्पन्नाः सर्वदा यज्ञबुद्धयः ।
पितृमातृपराश्चैव सन्त्वस्मत्कुलजा नराः ॥

अक्षताः पान्तु आशीर्ग्रहणमिति ब्राह्मणार्पणपुष्पाणि संगृह्य विशेष-पूजनं सव्येनैव पितृभ्यः स्वधायिभ्य० इति ।

आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।
प्रयच्छन्ति तथा राज्यं नृणां प्रीताः पितामहाः ॥
आयुः पुत्रान् यशः स्वर्गं कीर्तिं पुष्टिं बलं श्रियम् ।
पशून् सुखं धनं धान्यं प्राप्नुयां पितृपूजनात् ॥

ततः अपसव्येन पितामहपिण्डमुत्थाप्य सव्येन आघ्राय अपसव्येन पात्रान्तरे निधाय पिण्डस्थाने शङ्खचक्रादिकं लिखित्वा गन्धपुष्पाक्षतैः षड्ऋतून्पूजयेत् पिण्डस्थाने अत्रं नमः सुगन्धम् अक्षताः पुष्पाणि सव्येन तत्र दीपं संस्थाप्य ॐ वसन्ताय नमः ॐ ग्रीष्माय नमः ॐ वर्षाभ्यो नमः ॐ शरदे नमः ॐ हेमन्ताय नमः ॐ शिशिराय नमः । हस्तौ संहतौ कृत्वा ।

यान्तु पितृगणाः सर्वे यस्मात्स्थानादुपागताः ।
सर्वे ते हृष्टमनसः सर्वान्कामान्ददन्तु मे ॥
ये लोका दानशीलानां ये लोकाः पुण्यकर्मणाम् ।
सम्पूर्णान्सर्वभोगैस्तु तान्व्रजध्वं सुपुष्कलान् ॥
इहास्माकं शिवं शान्तिरायुरारोग्यसम्पदः ।
वृद्धिं सन्तानवर्गस्य जायतामुत्तरोत्तरा ॥

दीपस्थाने दीपः अपसव्येन पिण्डस्थाने पिण्डः असंचरमभ्युक्ष्य तर्पणं कुर्यात् ।

यः कश्चित्पितृरूपेण तिष्ठते परमेश्वरः ।
सोऽयं श्राद्धप्रदानेन तृप्तिं लभतु शाश्वतीम् ॥
गयायां पितृरूपेण स्वयमेको जनार्दनः ।
यं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ॥
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।

यत्र यत्र स्मरिष्यामि पितॄणां दत्तमक्षयम् ॥
शमीपत्रप्रमाणेन पिण्डं दद्याद् गयाशिरे ।
उद्धरेत्सप्तगोत्राणां कुलमेकोत्तरं शतम् ॥
पितुः शतगुणं पुण्यं सहस्रं मातुरुच्यते ।
भगिन्यां शतसाहस्रं सोदर्ये दत्तमक्षयम् ॥

सव्येन अद्यदिने अपरमपि आमं पक्वं हिरण्यम् उदयास्तमयपर्यन्तं यद्दत्तं यद्वास्ये तत्स्वर्गद्वारे अमृतीभूय वः स्वधा ।

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

इति त्रिवारं पठेत् ।

सप्तव्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ ।
चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ।
प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥
श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ।
मनसा च पितॄन् ध्यात्वा ॥

ततोऽपसव्येन अद्येहेत्याद्युच्चार्य अमुकगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणाम् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अक्षय्यतृप्त्यर्थं पुरूरवोमाद्रवसंज्ञकविश्वेदेवपूर्वकम् अर्घपिण्डसहितम् अमुकपार्वणश्राद्धं विसृजे सव्यम् इदम् अमुकपार्वणश्राद्धं विधिहीनं कालहीनं वाक्यहीनं श्रद्धाहीनं दक्षिणाहीनं यत्कृतं, तत्सुकृतमस्तु। प्रमादाल्लोभाद्वा यन्न कृतं तच्छ्रीविष्णोः

प्रसादात् ब्राह्मणवचनात् सर्वं परिपूर्णमस्तु अस्तु परिपूर्णम्। कुशेन विप्रस्पर्शः पितृब्राह्मणपूर्वकं ब्राह्मणानुत्थापयेत् पितृमातामहब्राह्मणयोः अपसव्येन उत्थापनं सव्येन वैश्वदेविकब्राह्मणस्य ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे उपप्रयन्तु मरुतः सुदानवऽइन्द्रप्प्राशूर्भवासत्रा ब्राह्मणानुत्थाप्य पात्रान्तरे निधाय ॐ व्वाजे वाजेवत व्वाजिनो नोधनेषु व्विप्राऽमृताऽऋतज्ञाः अस्य मध्वः पिबतमादयध्वं तृप्ता यात पथिभिर्देवयानैः इति विसृज्य कर्मपात्रं गृहीत्वा आमाव्वाजस्येत्यनुव्रज्य प्रदक्षिणीकरणं ॐ आमाव्वाजस्यप्प्रसवो जगम्यादेमद्यावापृथिवी विश्वरूपे आमागन्ताम्पितरो मातरो चामा सोमोऽमृतत्वेन गम्यात्। इत्यनुव्रज्य प्रदक्षिणीकृत्य नमस्कुर्यात् कर्मपात्रं विप्रपादाग्रे निनीय अपसव्येन नीवीं विसृज्य पाणिना दीपं निर्वाप्य 'त्रीन् समुद्रान् समसृपत् स्वर्गानपाम्पतिर्वृषभऽइष्टकानाम् पुरीषं व्वमानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः, सव्यं विधाय आचम्य हस्ते जलं गृहीत्वा—

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः॥
प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥
अद्य मे सफलं जन्म अद्य मे सफलं तपः।
अद्य मे गोत्रजाः सर्वे याता वोऽनुग्रहाद्दिवम्।
पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः।
तत्क्लेशमिह सञ्जातं विस्मृत्य क्षन्तुमर्हथ॥

सूक्तस्तोत्रजपं त्यक्त्वा पिण्डाघ्राणं च दक्षिणाम् ।
आह्वानं स्वागतं चार्घं विना च परिवेषणम् ॥
विसर्जनं सौमनस्यमाशिषं प्रार्थनं तथा ।
पित्र्यमन्यत्प्रकर्तव्यं प्राचीनावीतिना सदा ॥
दैवपूर्वमिदं श्राद्धं पितृपूर्वं विसर्जनम् ।
सर्वं कर्मापसव्येन दक्षिणादानवर्जितम् ॥
श्राद्धं भुक्त्वा य उच्छिष्टं वृषलाय प्रयच्छति ।
स मूढो नरकं याति कालसूत्रमवाक्शिराः ॥
रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्त्तिता हि सा ।
शुभम् । श्रीपितृस्वरूपियज्ञपुरुषाय नमः ॥

## ( ११ ) अथ अन्वष्टकाश्राद्धविधिः ।

तत्र पूर्वं मध्याह्नस्नानसङ्कल्पं कुर्यात् । ॐ विष्णुः ३ नमः परमात्मने अद्येह अमुकशर्मा ( वर्मा, गुप्तः, दासः ) अहं ( तिलमोटकयवयुतं जलं गृहीत्वा, अपसव्यं कृत्वा ) अमुकगोत्राणामस्मत् पितृपितामहप्रपितामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामक्षयतृप्तिप्राप्त्यर्थं पुरूरवोमाद्रवसंज्ञकविश्वेदेवपूर्वकार्घपिण्डसहितान्वष्टकापार्वणश्राद्धाधिकारसिद्ध्यर्थं सकलपापक्षयार्थं मध्याह्नस्नानं करिष्ये इति सङ्कल्प्य सव्येन स्नात्वा धौते वाससी परिधाय श्राद्धाङ्गतर्पणं कृत्वा दीपं प्रज्वाल्य आचम्य पवित्रपाणिः भूत्वा शुक्लाम्बरधरम्० इति विष्णुं सम्पूज्य हस्तौ संहतौ कृत्वा

ॐ यं ब्रह्म वेदान्तविदो वदन्ति परे प्रधानं पुरुषं तथाऽन्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय ॥

अभीप्सितार्थसिद्ध्यर्थं पूज्यते त्रिदशैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

इति पुष्पाञ्जलिं दत्त्वा ब्राह्मणान् तैलाभ्यङ्गं कारयित्वा संस्नाप्य प्रतिष्ठा—ॐ एतन्ते देव सवितर्य्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे तेन यज्ञमव तेन यज्ञपतिं तेन मामव । मनोजूतिर्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमं दधातु । ॐ विश्वेदेवा सऽइहमादयन्तामो३म् प्रतिष्ठ । ॐ भूर्भुवः स्वः वैश्वदेविक कुशब्रह्मन् सुप्रतिष्ठितो भव पुनः एतन्ते० इति पठित्वा पित्रादित्रयश्राद्धसम्बन्धि—कुशब्रह्मन् सुप्रतिष्ठितो भव । ॐ भूर्भुवः स्वः मातादित्रयश्राद्धसम्बन्धि कुशब्रह्मन् सुप्रतिष्ठितो भव । मातामहादित्रयश्राद्धसम्बन्धि—कुशब्रह्मन् सुप्रतिष्ठितो भव । विश्वेदेवनिमन्त्रणम् । ॐ विष्णुः ३ नमः परमात्मने अद्येहेत्यादि शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्र—अस्मत्पित्रादित्रयश्राद्धसम्बन्धिनां तथा अमुकगोत्र अस्मन्मात्रादित्रयश्राद्धसम्बन्धिनां तथा अमुकगोत्र अस्मन्मातामहादित्रयश्राद्धसम्बन्धिनां पुरूरवोमाद्रवसंज्ञकानां विश्वेषां देवानामद्यकर्तव्ये महालयापरपक्षान्तर्गते अन्वष्टकाश्राद्धे वैश्वदैविककृत्ये कुशब्रह्मन् त्वं मया निमन्त्रितः 'निमन्त्रितोऽस्मि' इति प्रत्युक्तिः हस्तौ संहतौ कृत्वा—

अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥
सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ।
भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि ॥

आगतं वः सुस्वागतम्, एतद्वः पाद्यमस्तु ।

यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे ।
तत्फलं पाण्डवश्रेष्ठ विप्राणां पादपूजने ॥

ततोऽपसव्येन तिलान् गृहीत्वा पितॄणां निमन्त्रणम् । अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणामद्य कर्तव्ये अन्वष्टकाश्राद्धे पित्रादित्रयकृत्ये कुशाब्रह्मन् त्वं मया निमन्त्रितः । निमन्त्रितोस्मि इति प्रत्युक्तिः । अक्रोधनैः० इति पठित्वा सव्येन आगतं वः सुस्वागतम् । अपसव्येन एतद्वः पाद्यमस्तु यत्फलं० इति पठित्वा पुनः तिलान् गृहीत्वा अद्येह० अमुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकीदेवीनां वसुरुद्रादित्यस्वरूपाणामद्य कर्तव्ये अन्वष्टकाश्राद्धे मात्रादित्रयश्राद्धकृत्ये कुशाब्रह्मन् त्वं मया निमन्त्रितः । निमन्त्रितोऽस्मि इति प्रत्युक्तिः । अक्रोधनैः० इति पठेत् । अद्येहेत्यादि अमुकगोत्राणामस्मन्मातामहप्रमातामह वृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामद्यकर्तव्ये महालयापरपक्षान्तर्गतान्वष्टकाश्राद्धे मातामहादित्रयश्राद्धकृत्ये कुशाब्रह्मन् त्वं मया निमन्त्रितः । निमन्त्रितोऽस्मि इति प्रत्युक्तिः । अक्रोधनैः० इति पठेत् । सव्येन आगतं वः सुस्वागतम् । अपसव्येन एतद्वः पाद्यमस्तु यत्फलं० इति पठेत् । पादार्घदानं [ स्थापनपक्षे सव्येन भूमौ शङ्खचक्रादिकं लिखित्वा आसनमासने पात्रं पात्रे पवित्रं, पवित्रेस्थो वैष्णव्यौ, शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये शंयोरभिस्रवन्तु नः । ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्दिवेत्वान्तरिक्षायत्वा पृथिव्यै त्वा शुन्धन्तां ल्लोकाः पितृषदनाः पितृषदनमसि । गन्धाक्षतपुष्पादि तूष्णीं प्रणवेन वा निःक्षिप्य पैतृककर्म आसनमासने पात्रं पात्रे पवित्रं पवित्रेस्थो वैष्णव्यौ, शन्नोदेवीति जलम् ।

तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः ।

प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रीणाहि नः स्वाहा ।

सव्येन पादपूजनं पित्रादित्रयकुशब्राह्मणपादार्चनविधौ अत्र नमः गन्धोऽस्तु स्वधा अक्षताः पुष्पाणि तुलसीदलानि एवं मात्रादित्रय-ब्राह्मणमातामहादित्रयब्राह्मणयोरपि सव्येन [ स्थापनपक्षे भो ब्राह्मण पादार्घपात्रसम्पत्तिरस्तु अस्तु सम्पत्तिः ] पादार्घपात्रं सम्पाद्य गन्ध-पुष्पाक्षतादि तूष्णीं निक्षिप्य पादार्घपात्रं गृहीत्वा अद्येहेत्यादि शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्र अस्मत्पित्रादित्रयश्राद्धसंबन्धिनः पुरूरवोमाद्रव-संज्ञकाः विश्वेदेवाः अद्य कर्तव्ये अन्वष्टकाश्राद्धे वैश्वदेविकब्रह्मन् एष ते पादार्घोऽस्तु । ततः पैतृकं कर्म ततः अपसव्येन अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्र अस्मत्पितृपितामहप्रपितामहाः अमुकामुकशर्माणः वसुरुद्रादित्यस्वरूपाः अद्यकर्तव्ये अन्वष्टकाश्राद्धे पित्रादित्रयश्राद्धसंबन्धि कुशब्रह्मन् एष ते पादार्घोस्तु । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्राः अस्मन्मातृपितामहीप्रपितामह्यः अमुकामुकीदेव्यः वसुरुद्रादित्यस्वरूपाः मात्रादित्रयश्राद्धसंबन्धिकुशब्रह्मन् एष ते पादार्घोस्तु अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्राः अस्मन्मातामहप्रमातामहवृद्ध-प्रमातामहाः अमुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अद्य कर्तव्ये अन्वष्टकाश्राद्धे मातामहादित्रयश्राद्धसंबन्धिकुशब्रह्मन् एष ते पादार्घोऽस्तु । पादार्घदानाचमनं सव्येन स्वयमाचम्य विश्वेदेवानाचा-

मयेत् । सव्येन श्राद्धदेशोपवेशनम् । भो ब्रह्मन् अत्र उपविश्यतामिति प्राङ्मुखं वैश्वदैविकब्राह्मणमपसव्येन उदङ्मुखान् पित्रादिब्राह्मणान् उपवेशयेत् । ततः सव्येन कर्मपात्रपूरणं भूमौ शंखचक्रादिकं लिखित्वा आसनमासने पात्रं पात्रे पवित्रं पवित्रेस्थो वैष्णव्यौ, शन्नोदेवीरिति जलं यवोसीति यवान् तिलोसीति तिलान् गन्धाक्षतपुष्पादि तूष्णीं प्रणवेन वा निक्षिप्य कर्मपात्रं सुसंपन्नमस्तु अस्तु सम्पन्नं तेन जलेन आत्मानं सम्प्रोक्ष्य श्राद्धसामग्रीं च सम्प्रोक्ष्य प्राणानायम्य ॐ पुण्डरीकाक्षाय नमः ३ ।

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

हस्तौ संहतौ कृत्वा

देवताभ्यः पितृभ्यश्च महायोगीभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

इति त्रिः पठित्वा

सप्तव्याधा दशार्णेषु मृगाः कालंजरे गिरौ ।
चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ।
प्रस्थिता दीर्घमध्वानं यूयं किमत्रसीदथ ॥
श्राद्धभूमौ गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ।
मनसा च पितॄन्ध्यात्वा················ ॥

ततोऽपसव्येन अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्म्मणां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकीदेवीनां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां स-

पत्नीकानां वसुरुद्रादित्यस्वरूपाणामक्षयतृप्तिप्राप्त्यर्थं पुरूरवोमार्द्रवसंज्ञक-विश्वेदेवपूर्वकमन्वष्टकाश्राद्धं समारभे । सव्येन

पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
यत्र यत्र स्मरिष्यामि पितॄणां दत्तमक्षयम् ॥

ततः अपसव्येन तिलमोटकं गृहीत्वा वामकक्ष्यां ॐ सोमस्य नीविरसि विष्णोः शर्म्मासि शर्म्म यजमानस्येन्द्रस्ययोनिरसि सुसस्याः कृषीस्कृधि इति नीवीं बद्ध्वा ततो दिग्बन्धनं मोटकान्गृहीत्वा

अग्निष्वाताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ।
तथा बर्हिषदः पान्तु याम्यांये पितरस्तथा ॥
प्रतीचीमाज्यपाः पान्तु उदीचीमपि सोमपाः ।
रक्षोभूतपिशाचेभ्यः तथैवासुरदोषतः ॥
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ।
तिला रक्षन्तु दितिजान् दर्भा रक्षन्तु राक्षसान् ।
पङ्क्तिं वै श्रोत्रियो रक्षेद् अतिथिः सर्वरक्षकः ॥
अत ऊर्ध्वं च कोणेषु हविष्मन्तश्च सर्वदा ।

ततः सव्येन साग्रान् कुशान् गृहीत्वा कर्मपात्रस्थं जलमभिलोडयेत् ।

ॐ यद्देवा देवहेडनं देवासश्चकृमा व्वयम् अग्निर्म्मा तस्मादेनसो विश्वान् मुञ्चत्वꣳ हसः । यदि जाग्रद्यदि स्वप्नऽएनाꣳसि चकृमावयम्, सूर्य्योमा तस्मादेनसो विश्वान् मुञ्चत्वꣳ हसः गायत्र्या च ततो दर्भतिलयुतं जलं गृहीत्वा पाकपिधानमुत्तार्य्य शूद्रादिदृष्टिदूषितपाकः पूतोऽस्तु इति गायत्र्या अन्नं सम्प्रोक्ष्य प्रतिज्ञा ॐ विष्णुः३ नमः परमात्मने श्रीपुराणपुरुषोत्तमाय अत्र पृथिव्यां जम्बूद्वीपे भरतखण्डे

आर्यावर्ते पुण्यक्षेत्रे भारतवर्षैकदेशे [ हिमवत्पर्वतैकदेशे देशान्तरश्चेत् तद्देशनाम ग्राह्यं ] ब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कृतत्रेताद्वापरान्ते कलियुगस्य प्रथमचरणे षष्ट्यब्दानां मध्ये अमुकनामसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रोत्पन्नः अमुकराशिः अमुकशर्माऽहम् अपसव्यं कृत्वाअमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणां-तथा अमुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकीदेवीनां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामक्षयतृप्तिकामनया पुरूरवोमार्द्रवसंज्ञकविश्वेदेवपूर्वकमर्घपिण्डसहितं पार्वणविधानेन अन्वष्टकाश्राद्धं करिष्ये ॐ कुरुष्व इति प्रत्युक्तिः।

ततः आसनम्, ऋजुकुशद्वययवानादाय अद्येहेत्यादि शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्र अस्मत्पित्रादित्रयश्राद्धसंबन्धिनां तथा अमुकगोत्र मात्रादित्रयश्राद्धसंबन्धिनां तथा अमुकगोत्रमातामहादित्रयश्राद्धसम्बन्धिनां पुरूरवोमार्द्रवसंज्ञकानां विश्वेषां देवानाम् इदमासनमस्तु ॐ भूर्भुवः स्वः इदमासनमास्यताम्, आसे ततः अपसव्येन तिलमोटकं गृहीत्वा पैतृकं कर्म—अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणामस्मिन् अन्वष्टकाश्राद्धे पित्रादित्रयश्राद्धसंबन्धि—कुशब्रह्मन् इदमासनमस्तु। सव्येन ॐ भूर्भुवः स्वः इदमासनमास्यताम् आसे। अपसव्यम्, अद्येह शरदृतौ

आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाम्, अमुकामुकीदेवीनां वसुरुद्रादित्यस्वरूपाणामस्मिन् अन्वष्टकाश्राद्धे मात्रादित्रयश्राद्धसंबन्धि कुशाब्रह्मन् इदमासनमस्तु, सव्येन ॐ भूर्भुवः स्वः इदमासनमास्यतामासे अपसव्यं विधाय अद्येह दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामस्मिन् अन्वष्टकाश्राद्धे मातामहादित्रयश्राद्धसम्बन्धि–कुशाब्रह्मन् इदमासनमस्तु सव्येन ॐ भूर्भुवः स्वः इदमासनमास्यताम् आसे ततः आवाहनम्, ऋजुकुशद्वययवान् गृहीत्वा अद्येह दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रान् अस्मत्पित्रादित्रयश्राद्धसंबन्धिनः तथा अमुकगोत्रान् अस्मन्मात्रादित्रयश्राद्धसंबन्धिनः तथा अमुकगोत्रान् अस्मन्मातामहादित्रयश्राद्धसंबन्धिनः पुरूरवोमाद्रवसंज्ञकान् विश्वान्देवान् अहमावाहयिष्ये ॐ आवाहय इति प्रत्युक्तिः ॐ विश्वे देवा स आगत शृणुतामऽइमᳬहवम् इदं बर्हिर्निषीदत इत्यावाह्य प्रदक्षिणं यवानवकीर्य ॐ विश्वेदेवा शृणुतेमᳬहवं मे ये अन्तरिक्षे यऽउपद्यविष्ठ ये अग्निजिह्वा उतवायजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम्, इति जप्त्वा

विश्वायां दत्तकन्यायां जाता धर्मान्महात्मनः।
विश्वे देवा इति ख्याता महावीर्या महाबलाः॥
शक्रेण सह योध्दॄणां विजेतारश्च रक्षसाम्।
यन्नामस्मरणादेव प्रद्रवन्त्यसुराः क्षणात्॥

बाणबाणासनधरा द्विभुजाः श्वेतवाससः ।
केयूरिणः कुण्डलिनः किरीटकटकान्विताः ॥
धैर्यसौन्दर्यसंयुक्ता दिव्यस्रगनुलेपनाः ।
इन्द्रस्यानु चराः सर्वे गोप्तारश्च दिवौकसाम् ॥
शुक्लाम्बराः शुक्लगन्धाः शुक्लयज्ञोपवीतिनः ।
आत्मनोऽभिमुखासीना ज्ञानमुद्रा निरायुधाः ॥
वसवः पितरो ज्ञेया रुद्रास्तत्र पितामहाः ।
पितुः पितामहाः प्रोक्ता आदित्या बर्हिषस्तथा ॥
आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ।
ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥

ततः अपसव्येन तिलमोटकं गृहीत्वा अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्रानस्मत्पितृपितामहप्रपितामहान् अमुकामुकशर्मणः वसुरुद्रादित्यस्वरूपान् पितॄन् अहमावाहयिष्ये ॐ आवाहय ॐ उशन्तस्त्वानिधीमह्युशन्तः समिधीमहि उशन्नुशत आवह पितॄन् हविषे अत्तवे इत्यावाह्य अप्रदक्षिणं तिलानवकीर्य

ॐ आयन्तु नः पितरः सोम्म्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तो ऽधिब्रुवन्तु तेऽवन्त्वस्मान् ।

इति जपेत्, अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्राः अस्मन्मातृपितामहीप्रपितामहीः अमुकामुकीदेवीः वसुरुद्रादित्यस्वरूपाः मातॄः आवाहयिष्ये ॐ आवाहय ॐ उशन्तस्त्वानिधीमह्युशन्तः समिधीमहि उशन्नुशत आवह पितॄन्हविषे अत्तवे । इत्यावाह्य अप्रदक्षिणं तिलान्विकीर्य आय-

न्तु न इति जपेत्। अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रान् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहान् अमुकामुकशर्मणः सपत्नीकान् वसुरुद्रादित्यस्वरूपान् मातामहादीन् अहमावाहयिष्ये ॐ आवाहय ॐ उशन्तस्त्वेत्यनया आवाह्याप्रदक्षिणं तिलानवकीर्य आयन्तु न इति जपेत् ततः सव्येन हस्तार्घसम्पादनं देवाग्रे त्रीणि एकं वा, शङ्खचक्रादिकं लिखित्वा आसनमासने पात्रं पात्रे पवित्रं पवित्रेस्थो वैष्णव्यौ शन्नोदेवीति जलं यवोसीति यवान् गन्धाक्षतपुष्पादि तूष्णीं प्रणवेन वा निक्षिप्य एवं रीत्या त्रीणि पित्रर्घपात्राणि मात्रर्घपात्राणि मातामहार्घ पात्राणि स्थापयेत्, आसनमासने पात्रं पात्रे पवित्रं पवित्रेस्थो वैष्णव्यौ शन्नोदेवीति जलम्।

तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः।
प्रत्नमद्भिः पृक्तः स्वधया पितॄंल्लोकान्प्रीणाहि नः स्वाहा ॥

गन्धाक्षतपुष्पादि तूष्णीं प्रणवेन वा यथाधिकारं निक्षिप्य ततः भो ब्राह्मणाः देवार्घपात्रसम्पत्तिरस्तु। अस्तु सम्पत्तिः। अपसव्येन पित्रर्घपात्राणि मात्रर्घपात्राणि मातामहार्घपात्राणि परिपूर्णानि सन्तु सन्तु ततः सव्येन पवित्रं गृहीत्वा विप्रहस्ते समर्प्य सपवित्रेषु हस्तेषु ॐ या दिव्या आपः पयसा संबभूवुर्याऽअन्तरिक्षाऽउतपार्थिवीर्याः। हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः शᳫंस्योनाः सुहवा भवन्तु। अद्येह० दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रा अस्मत्पित्रादित्रयश्राद्धसम्बन्धिनः पुरूरवोमार्द्रवसंज्ञका विश्वेदेवाः अस्मिन् अन्वष्टकाश्राद्धे एष ते हस्तार्घोस्तु। पुनः प्रत्यर्घं च पैतृकं कर्म सपवित्रेषु हस्तेषु ॐ या दिव्या इति पठित्वा केषांचिन्मते अपसव्येन हस्तार्घसङ्कल्पः। अद्येह० शरदृतौ आश्वि-

नमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्र अस्मत्पितः अमुकशर्मन् वसुस्वरूप अस्मिन् अन्वष्टकाश्राद्धे पित्रादित्रयश्राद्धसम्बन्धि–कुशब्रह्मन् एष हस्तार्घोऽस्तु । पुनः प्रत्यर्घं च । सपवित्रेषु हस्तेषु० या दिव्या इति पठित्वा अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यागते सवितरि नवम्यां तिथौ अमुकगोत्र अस्मत्पितामह अमुकशर्मन् रुद्रस्वरूप अस्मिन् अन्वष्टकाश्राद्धे पित्रादित्रयश्राद्धसम्बन्धि–कुशब्रह्मन् एष हस्तार्घोऽस्तु । पुनः प्रत्यर्घं च सपवित्रेषु हस्तेषु० या दिव्या० इति पठेत् अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुक गोत्र अस्मत्प्रपितामह अमुकशर्मन् आदित्यस्वरूप अस्मिन् अन्वष्टकाश्राद्धे पित्रादित्रयश्राद्धसंबन्धिकुशब्रह्मन् एष ते हस्तार्घोऽस्तु पुनः प्रत्यर्घं च सपवित्रेषु हस्तेषु० या दिव्या० इति पठित्वा अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रे अस्मन्मातः अमुकीदेवि वसुस्वरूपे अस्मिन् अन्वष्टकाश्राद्धे मात्रादित्रयश्राद्धसंबन्धिकुशब्रह्मन् एष ते हस्तार्घोऽस्तु पुनः प्रत्यर्घं च सपवित्रेषु हस्तेषु० या दिव्या० इति पठित्वा अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रे अस्मत्पितामहि अमुकीदेवि रुद्रस्वरूपे अस्मिन्नन्वष्टकाश्राद्धे मात्रादित्रयश्राद्धसम्बन्धि कुशब्रह्मन् एष ते हस्तार्घोऽस्तु पुनः। प्रत्यर्घं च सपवित्रेषु हस्तेषु० या दिव्या० इति पठित्वा अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रे अस्मत्प्रपितामहि अमुकीदेवि आदित्यस्वरूपे अस्मिन् अन्वष्टकाश्राद्धे मात्रादित्रयश्राद्धसम्बन्धि कुशब्रह्मन् एष ते हस्तार्घोऽस्तु । पुनः प्रत्यर्घं च

सपवित्रेषु हस्तेषु० या दिव्या० इति पठित्वा अद्येह० शरदृतौ आश्विवमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्र अस्मन्मातामह अमुकशर्मन् सपत्नीक वसुस्वरूप अस्मिन् अन्वष्टकाश्राद्धे मातामहादित्रयश्राद्धसंबन्धि कुशब्रह्मन् एष ते हस्तार्घोऽस्तु पुनः प्रत्यर्घं च। सपवित्रेषु हस्तेषु० या दिव्या० इति पठित्वा अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्र अस्मत्प्रमातामह अमुकशर्मन् सपत्नीक रुद्रस्वरूप अस्मिन् अन्वष्टकाश्राद्धे मातामहादित्रयश्राद्धसम्बन्धि कुशब्रह्मन् एष ते हस्तार्घोऽस्तु पुनः प्रत्यर्घं च सपवित्रेषु हस्तेषु या दिव्या इति पठित्वा अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्र अस्मद्वृद्धप्रमातामह अमुकशर्मन् सपत्नीक आदित्यस्वरूप अस्मिन् अन्वष्टकाश्राद्धे मातामहादित्रयश्राद्धसंबन्धि कुशब्रह्मन् एष ते हस्तार्घोऽस्तु पुनः प्रत्यर्घं च। ततः सर्वान् संस्रवान् प्रथमे पितृपात्रे समवनीय

अर्घोदकं श्रियं दद्यात् पुत्रपौत्रादिवर्धनम् ।
यस्मात् तस्मात् शिवं मे स्यात् इह लोके परत्र च ॥

अस्मत्कुले दीर्घमायुः अस्तु, अस्तु, शान्तिः अस्तु अस्तु । पुष्टिः अस्तु अस्तु । वृद्धिः अस्तु अस्तु । यत् श्रेयः तत् अस्तु अस्तु । यत् पापं रोगः शोकः कष्टं दुःखं दारिद्र्यं तत्प्रतिहतमस्तु अमृताभिषेकोऽस्तु इति मूर्ध्नि अभिषिच्य अपसव्येन पितृवामभागे कुशान् आस्तीर्य तदुपरि सपवित्रमर्घपात्रं पितृभ्यः स्थानमसि इति न्युब्जं कृत्वा तदुपरि स्वधावाचनीयान् सपवित्रान् त्रीन्कुशान् दक्षिणाग्रान् संस्थाप्य ॐ शुन्धन्तांल्लोकाः पितृषदनाः पितृषदनमसि इति सम्प्रोक्ष्य पितृभ्यः स्वधायिभ्यः० इति पूजनम्

ततः अङ्गुष्ठपवित्रे त्यक्त्वा सव्येन पूजनं विश्वेषां देवानामर्चनविधौ अत्रं नमः इति विश्वेदेवब्राह्मणहस्ते जलं दत्त्वा

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥

अनेन गन्धादिभिः पूजनं गन्धोऽस्तु स्वाहा । यवाः पुष्पाणि तुलसीदलानि अपसव्येन पितॄणामर्चनविधौ अत्रं नमः ।

पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ॐ अक्षन्नपितरो मीमदन्तपितरो तीतृपन्त पितरः पितरः शुन्धध्वम् । अनेन पितॄणां पूजनम् ॐनमोवः पितरो रसाय० इति मातामहादीनां शेषं पूर्ववत् गन्धोऽस्तु स्वधा अक्षताः पुष्पाणि तुलसीदलानि धूपदीपौ पुनः पवित्रंकरे कृत्वा सव्येन यवकुशान्गृहीत्वा अद्येह दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यां गते सवितरि नवम्यां तिथौ अमुकगोत्र अस्मत्पित्रादित्रयश्राद्धसंबन्धिनः तथा अमुकगोत्र अस्मन्मात्रादित्रय श्राद्धसंबन्धिनः तथा अमुकगोत्र अस्मन्मातामहादित्रयश्राद्धसंबन्धिनः पुरूरवोमाद्रवसंज्ञकविश्वेदेवा अर्चनविधौ इमानि गन्धाक्षतपुष्पतुलसीदलधूपदीपवासोभूषणादीनि मद्दत्तानि यथाविभागं वः स्वधा । ततोऽपसव्येन तिलमोटकं गृहीत्वा अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रा अस्मत्पितृपितामहप्रपितामहाः अमुकामुकशर्माणः वसुरुद्रादित्यस्वरूपाः तथा अमुकगोत्राः अस्मन्मातृपितामहीप्रपितामह्यः अमुकामुकीदेव्यः वसुरुद्रादित्यस्वरूपाः तथा अमुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः अस्मिन् अन्वष्टका-

श्राद्धे कुशविप्रार्चनविधौ इमानि गन्धाक्षतपुष्पतुलसीदलधूपदीपवासो-भूषणादीनि मद्दत्तानि यथाविभागं वः स्वधा। सङ्कल्पः पृथक् २ कार्यः। सव्येन विश्वेदेवार्चनविधेः सर्वं परिपूर्णमस्तु । अस्तु परिपूर्णम् । अपसव्येन गन्धादिदानाचमनं सव्येन स्वयमाचम्य विश्वेदेवं ब्राह्मणमाचामयेत् । अपसव्येन पित्रादिब्राह्मणान् आचामयेत् । अच्युतस्मरणं ततः सव्येन वैश्वदेविकब्राह्मणसमीपे अपसव्येन पित्रादिब्राह्मणानां समीपे

यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति ।
एवं मण्डलभस्माङ्कः सर्वभूतानि रक्षतु ॥

इति भस्मना चतुष्कोणमण्डलानि विधाय तेषामुपरि भोजन-पात्राणि संस्थाप्य पितृद्विजसमीपे जलपात्रं संस्थाप्य घृताक्तमन्नं पिहितमादाय उद्धृत्य सम्प्रोक्ष्य पृच्छति—भो ब्राह्मणा युष्मदनुज्ञया विप्र-पाणौ जले वा अग्नौकरणहोमं करिष्ये ॐ कुरुष्व इति प्रत्युक्तिः विप्रपाणौ जले वा अग्नौकरणहोमः—अपसव्येन तिलमोटकयुतमन्नं गृहीत्वा ॐ अग्नये कव्यवाहनाय स्वाहा इदमग्नये कव्यवाहनाय । ॐ सोमाय पितृमते स्वाहा इदं सोमाय पितृमते । किंचित् शेषं ब्राह्मणभोजनपात्रेषु पिण्डार्थमपि स्थापयेत् । ततः सव्येन परिवेषणम् । प्रथमं विष्णवे नैवेद्यं समर्प्य ततो वैश्वदेविकपूर्वकं सुशीतलजलसहितोष्णान्न परिवेषणम् रजतादिपात्रेषु कुर्यात्। गायत्र्या अन्नं सम्प्रोक्ष्य अन्वाचित-दक्षजानुः स्वस्तिकाकृतिना अधोमुखेन वामोपरिस्थितेन दक्षिणहस्तेन मधु मधु इति पात्रमालभ्य जपति पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि जिष्णो हव्यꣳरक्ष । इति प्रादक्षिण्येन यवान् विकीर्य अपहता असुरा रक्षाꣳसि वेदिषदः ।

अङ्गुष्ठग्रहणमिदं विष्णु० इति पठित्वा इदमन्नम्, इमा आप: इदं शाकादिकं सर्वं हवि: अद्येह० दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्र अस्मत्पित्रादित्रयश्राद्धसम्बन्धिभ्य: तथा अमुकगोत्र अस्मन्मात्रादित्रयश्राद्धसन्बन्धिभ्य: तथा अमुकगोत्रास्मन्मातामहादित्रयश्राद्धसम्बन्धिभ्य: पुरूरवोमार्द्रवसंज्ञकेभ्य: विश्वेभ्यो देवेभ्य: अस्मिन् अन्वष्टकाश्राद्धे इदमन्नम् इमा आप: इदमाज्यमिदं शाकादिकं यत्परिविष्टं यत्परिवेक्ष्यमाणं ब्राह्मणस्याऽऽतृप्तिपर्यन्तममृतस्वरूपं यद्दत्तं यथाविभागं व: स्वधा इति भूमौ जलं प्रदद्यात् ब्राह्मणहस्तदाने प्रत्यवाय: ॐ ये देवासो दिव्येकादशस्थपृथिव्यामध्येकादशस्थ अप्सुक्षितोमहिनैकादशस्थ ते देवासो यज्ञमिमं जुषध्वम्। स्वाहा देवेभ्य: विप्रहस्ते जलमर्पयेत्। अपोशानं दत्त्वा यथासुखेन भुङ्ग्ध्वम् भुञ्ज्महि इति विप्रोक्ति: अपसव्यम्, अन्वाचितवामजानु: स्वस्तिकाकृतिना ऊर्ध्वमुखेन दक्षिणोपरि स्थितेन वामहस्तेन मधु मधु मधु पात्रमालभ्य जपति पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि विष्णो कव्यꣳरक्ष अप्रादक्षिण्येन तिलान् विकीर्य अपहता असुरा रक्षाꣳसि वेदिषद: अङ्गुष्ठग्रहणम्। इदं विष्णु:० इति पठित्वा इदमन्नमिमा आप: इदमाज्यमिदं शाकादिकं सर्वं कव्यम्। अद्येह० दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरिअन्वष्टकायां नवम्यां तिथौ अमुकगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्य: अमुकामुकशर्मभ्यो वसुरुद्रादित्यस्वरूपेभ्योऽस्मिन् अन्वष्टकाश्राद्धे इदमन्नमिमा आप: इदमाज्यमिदं शाकादिकं यत्परिविष्टं यत्परिवेक्ष्यमाणं ब्राह्मणस्यातृप्तिपर्यन्तं ब्राह्मणेभ्य: आतृप्तिदास्यमानमन्नं च अमृतस्वरूपं मद्दत्तं यथाविभागं व: स्वधा।

ॐ ये चेह पितरो ये चनेह यांश्च विद्मयाँ३।।ऽउचनप्रविद्मत्वं त्वेत्थयति ते जातवेदः स्वधाभिर्यज्ञꣳसुकृतं जुषस्व।

इति पितृब्राह्मणहस्ते अपोशानं दत्त्वा यथासुखेन भुङ्ध्वम् भुञ्जमहि ॥

पुनः उत्तानाभ्यां पाणिभ्यां मधु मधु पात्रमालभ्य जपति— पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि विष्णो कव्यꣳरक्ष। तिलान् विकीर्य अपहता असुरा रक्षाꣳसि वेदिषदः अंगुष्ठग्रहणम् इदं विष्णुर्विचक्रमे० इति इदमन्नमिमा आपः इदमाज्यमिदं शाकादिकं सर्वं कव्यमद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्राभ्यः अस्मन्मातृपितामहीप्रपितामहीभ्यः अमुकामुकीदेवीभ्यो वसुरुद्रादित्यस्वरूपाभ्योऽस्मिन् अन्वष्टकाश्राद्धे इदमन्नमिमा आपः इदमाज्यमिदं शाकादिकं यत्परिविष्टं यत्परिवेदयमाणं ब्राह्मणस्यातृप्तिपर्यन्तं ब्राह्मणेभ्यः आतृप्तिदास्यमानमन्नं च अमृतस्वरूपं मद्दत्तं यथाविभागं वः स्वधा ॐ ये चे ह इति पठित्वा अपोशानं दत्त्वा यथासुखेन भुङ्ध्वम् भुञ्जमहि, इति विप्रोक्तिः पुनः उत्तानाभ्यां पाणिभ्यां मधु मधु पात्रमालभ्य जपति पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि विष्णो कव्यꣳरक्ष तिलान् विकीर्य अपहता असुरा रक्षाꣳसि वेदिषदः अङ्गुष्ठग्रहणमिदं विष्णुः० इति पठित्वा इदमन्नमिमा आपः इदमाज्यमिदं शाकादिकं सर्वं कव्यम्। अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्रेभ्यः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्योऽमुकामुकशर्मभ्यः सपत्नीकेभ्यः वसुरुद्रादित्यस्वरूपेभ्यः अस्मिन् अन्वष्टकाश्राद्धे इदमन्नमिमा आपः इदमाज्यमिदं शाकादिकं यत्परिविष्टं

यत्परिवेद्यमाणं ब्राह्मणस्यातृप्तिपर्यन्तं ब्राह्मणेभ्यः आतृप्तिदारयमानमन्नं च अमृतस्वरूपं मद्दत्तं यथाविभागं वः स्वधा ॐ ये चेह० इति पठेत् अपोशानं दत्त्वा यथासुखेन भुङ्ध्वम् भुञ्ज्महि इति विप्रोक्तिः ततः सव्येन प्रणवव्याहृतिपूर्वकं गायत्रीं मधुमतीम् ऋक्त्रयं च पठेत् ।

ॐ मधु ३ मधुव्वाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्न्नः सन्त्वोषधीः मधुनक्तमुतोषसो मधुमत्पार्थिवᳬरजः मधुद्यौरस्तु नः पिता मधुमान्नो व्वनस्पतिर्मधुमाँ२॥ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः ॐ मधु ३ ।

यथाशक्त्या पितृसूक्त–पुरुषसूक्त–आशुः शिशान इत्यादि सप्तदशर्चोरुस्तवादीन्यश्नत्सु पठेत्, ततः तुलसी–शर्करा–गव्यदुग्धाज्यमधुतिलगंगाजलयुतमन्नमेकपात्रे कृत्वा कर्मपात्रोदकं विष्णुनिवेदितभक्तमग्नौकरणान्नशेषमपि दत्त्वा अपसव्येन पिण्डान् निर्माय विकिरदानं–नैरृत्यां दिशि कुशत्रयं भूमौ क्षिप्त्वा आसने मोटकं गृहीत्वा

असँस्कृतप्रमीतानां त्यागिनां कुलभागिनाम् ।
उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ॥
इत्यासनं दत्त्वा सजलतिलैर्मोटकयुतमन्नं विकिरेत् ।
अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥
येषां न पचते माता येषां न पचते पिता ।
उच्छिष्टं ये च कांक्षन्ति तेभ्योऽन्नं दत्तमक्षयम् ॥

उच्छिष्टभागधेयेभ्यो नमः इति गन्धाक्षतपुष्पैः पूजनम् । अङ्गुष्ठपवित्रे त्यक्त्वा हस्तौ पादौ प्रक्षाल्य सव्येन आचम्य ततः श्राद्धदेशमागत्य अन्येअङ्गुष्ठपवित्रे करे कृत्वा आचामेत् अपसव्येन पितृपूर्वं सकृत

सकृत् अपो दत्त्वा सव्येन विश्वेदेवब्राह्मणहस्तेऽपि चुलुकदानम् पूर्ववद् गायत्रीं मधुमतीं मध्विति च जपित्वा भो ब्राह्मणा अस्मिन् पाकमध्ये यत्किञ्चिद्रोचते तत्प्रतिगृह्यताम् , तृप्ताः स्थ तृप्ताः स्मः शेषान्नेन किं क्रियताम् इष्टैः सह भुज्यताम् । अपसव्येन पिण्डदानार्थं गोमयेन वेदिकालेपनम् । अपहता असुरा रक्षांꣳसि वेदिषद इति कुशेन रेखाकरणम् उल्मुकधारणम् , ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति परापुरोनिपुरो ये भरन्त्यग्निष्टांल्लोकान्प्रणुदात्यस्मान् अवनेजनम् सतिलमोटकयुतं जलं गृहीत्वा अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्र अस्मत्पितः अमुकशर्मन् वसुस्वरूप अस्मिन्नन्वष्टकाश्राद्धे पिण्डासने अवनेनिक्ष्व अद्येह० अमुकगोत्र अस्मत्पितामह अमुकशर्मन् रुद्रस्वरूप अस्मिन् अन्वष्टकाश्राद्धे पिण्डासने अवनेनिक्ष्व अद्येह० अमुकगोत्र अस्मत्प्रपितामह अमुकशर्मन् आदित्यस्वरूप अस्मिन् अन्वष्टकाश्राद्धे पिण्डासने अवनेनिक्ष्व । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्रे अस्मन्मातः अमुकि देवि वसुस्वरूपे अस्मिन् अन्वष्टकाश्राद्धे पिण्डासने अवनेनिक्ष्व, अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यां गते सवितरि नवम्यां तिथौ अमुकगोत्रे अस्मत्पितामहि अमुकि देवि रुद्रस्वरूपे अस्मिन् अन्वष्टकाश्राद्धे पिण्डासने अवनेनिक्ष्व । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यां गते सवितरि नवम्यां तिथौ अमुकगोत्रे अस्मत्प्रपितामहि अमुकि देवि आदित्यस्वरूपे अस्मिन् अन्वष्टकाश्राद्धे पिण्डासने अवनेनिक्ष्व। अद्येह शरदृतौ आश्विनमासे कृष्णपक्षे कन्यां गते सवितरि नवम्यां

तिथौ अमुकगोत्र अस्मन्मातामह अमुकशर्मन् सपत्नीक वसुस्वरूप अस्मिन्महालयापरपक्षान्तर्गत–अन्वष्टकाश्राद्धे पिण्डासने अवनेनिक्ष्व । अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यां गते सवितरि नवम्यां तिथौ अमुकगोत्र अस्मत्प्रमातामह अमुकशर्मन् सपत्नीक रुद्र-स्वरूप अस्मिन्महालयापरपक्षान्तर्गत–अन्वष्टकाश्राद्धे पिण्डासने अवने-निक्ष्व । अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यां गते सवितरि नवम्यां तिथौ अमुकगोत्र अस्मद्वृद्धप्रमातामह अमुकशर्मन् सपत्नीक आदित्यस्वरूप अस्मिन्महालयापरपक्षान्तर्गत-अन्वष्टकाश्राद्धे पि-ण्डासने अवनेनिक्ष्व । ततः उपमूललूनकुशास्तरणम् सव्येन पदस्मरणम् ।

ईशानविष्णुकमलासनकार्तिकेय-
वह्नित्रयार्करजनीशगणेश्वराणाम् ।
क्रौञ्चामरेज्यकलशोद्भवकाश्यपानां
पादान्नमामि सततं पितृमुक्तिहेतोः ॥

गङ्गागयादीन् संस्मृत्य गयायै नमः गदाधराय नमः कुरुक्षेत्राय नमः तीर्थराजप्रयागाय नमः अयोध्या मथुरा माया० इति पठित्वा पितृस्वरूपं ध्यात्वा भो ब्राह्मणा युष्मदनुज्ञया पिण्डदानमहं करिष्ये ॐ कुरुष्व ततः अपसव्येन तिलमोटकयुतं पिण्डं गृहीत्वा वामजान्व-न्वाच्य अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्र अस्मत्पितः अमुकशर्मन् वसुस्वरूप अस्मिन् अन्वष्टकाश्राद्धे एषोऽन्नपिण्डो अमृतस्वरूपो मद्दत्तस्तेऽस्तु इयं भूमिः गयातुल्या इदमुदकं गाङ्गं गंगाजलतुल्यं वा अमुकगोत्राय अस्मत्पित्रे अमुकशर्मणे वसुस्वरूपाय० अद्येह शरदृतौ आश्विनमासे महालया-परपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्र अस्मत्पिता-

मह अमुकशर्मन् रुद्रस्वरूप अस्मिन् अन्वष्टकाश्राद्धे एषोऽन्नपिण्डः अमृतस्वरूपो मद्दत्तस्तेऽस्तु । इयं भूमिर्गयातुल्या इदमुदकं गाङ्गं गङ्गाजलतुल्यं वा अमुकगोत्राय अस्मत्पितामहाय अमुकशर्मणे रुद्रस्वरूपाय० अद्येह शरद्दतौ आश्विनमासे महालयापरपक्षे कन्यां गते सवितरि अन्वष्टकायां तिथौ अमुकगोत्र अस्मत्प्रपितामह अमुकशर्मन् आदित्यस्वरूप अस्मिन् अन्वष्टकाश्राद्धे एषः अन्नपिण्डः अमृतस्वरूपो मद्दत्तस्तेऽस्तु इयं भूमिर्गयातुल्या इदमुदकं गाङ्गं गङ्गाजलतुल्यं वा अमुकगोत्राय अस्मत्प्रपितामहाय अमुकशर्मणे आदित्यस्वरूपाय० अद्येह शरद्दतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्रे अस्मन्मातः अमुकिदेवि वसुस्वरूपे अस्मिन् अन्वष्टकाश्राद्धे एषः अन्नपिण्डः अमृतस्वरूपो मद्दत्तस्तेऽस्तु इयं भूमिर्गयातुल्या इदमुदकं गाङ्गं गंगाजलतुल्यं वा अमुकगोत्रायै अस्मन्मात्रे अमुकदेव्यै वसुस्वरूपायै० अद्येह शरद्दतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्रे अस्मत्पितामहि अमुकीदेवि रुद्रस्वरूपे अस्मिन् अन्वष्टकाश्राद्धे एषः अन्नपिण्डः अमृतस्वरूपो मद्दत्तस्तेऽस्तु इयं भूमिर्गयातुल्या इदमुदकं गाङ्गं गंगाजलतुल्यं वा अमुकगोत्रायै अस्मत्पितामह्यै अमुकदेव्यै रुद्रस्वरूपायै० अद्येह शरद्दतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्रे अस्मत्प्रपितामहि अमुकिदेवि आदित्यस्वरूपे अस्मिन् अन्वष्टकाश्राद्धे एषोऽन्नपिण्डोऽमृतस्वरूपो मद्दत्तस्तेऽस्तु इयं भूमिः गयातुल्या इदमुदकं गांगं गंगाजलतुल्यं वा अमुकगोत्रायै अस्मत्प्रपितामह्यै अमुकदेव्यै आदित्यस्वरूपायै अद्येह शरद्दतौ आश्विनमासे महालयापरपक्षे

कन्यांगते सवितरि अन्वष्टकायां नवम्यां अमुकगोत्र अस्मन्मातामह अमुकशर्मन् सपत्नीक वसुस्वरूप अस्मिन् अन्वष्टकाश्राद्धे एषोऽन्नपिण्डोऽमृतस्वरूपो मद्दत्तस्तेऽस्तु इयं भूमिर्गयातुल्या इदमुदकं गाङ्गं गंगाजलतुल्यं वा अमुकगोत्राय अस्मन्मातामहाय अमुकशर्मणे सपत्नीकाय वसुस्वरूपाय० अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्र अस्मत्प्रमातामह अमुकशर्मन् सपत्नीक रुद्रस्वरूप अस्मिन् अन्वष्टकाश्राद्धे एषोऽन्नपिण्डोऽमृतस्वरूपो मद्दत्तस्तेऽस्तु । इयं भूमिर्गयातुल्या इदमुदकं गाङ्गं गंगाजलतुल्यं वा अमुकगोत्राय अस्मत्प्रमातामहाय अमुकशर्मणे रुद्रस्वरूपाय अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्र अस्मद्वृद्धप्रमातामह अमुकशर्मन् सपत्नीक आदित्यस्वरूप अस्मिन् अन्वष्टकाश्राद्धे एषः अन्नपिण्डः अमृतस्वरूपः मद्दत्तः तेस्तु इयं भूमिर्गयातुल्या इदमुदकं गांगं गङ्गाजलतुल्यं वा अमुकगोत्राय अस्मद्वृद्धप्रमातामहाय अमुकशर्मणे सपत्नीकाय आदित्यस्वरूपाय । लेपभागिनाम् अयं भागोऽस्तु इति पिण्डपार्श्वे दद्यात् प्रतिपिण्डं प्रतिवर्गं वा कुलाचारात् पिण्डास्तरणकुशेषु करोन्मार्जनं कृत्वा हस्तप्रक्षालनं सव्येन पिण्डदानाचमनं उदङ्मुखेन अपसव्येन अत्र पितरः० इति जपः अत्र पितरोमादयध्वं यथाभागमावृषायद्ध्वम् सव्येन उदङ्मुखेनैव मरुन्नियमनम् । ततः परावृत्य अपसव्येन अमीमदन्त पितरो यथाभागमावृषायिषत ततः प्रत्यवनेजनम् अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्र अस्मत्पितः अमुकशर्मन् वसुस्वरूप अस्मिन् अन्वष्टकाश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व अद्येह० शरदृतौ आश्विनमासे महा-

लयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्र अस्मत्पितामह अमुकशर्मन् रुद्रस्वरूप अस्मिन् अन्वष्टकाश्राद्धे पिण्डे प्रत्यवने निक्ष्व । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्र अस्मत्प्रपितामह अमुकशर्मन् आदित्यस्वरूप अस्मिन् अन्वष्टकाश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्रे अस्मन्मातः अमुकिदेवि वसुस्वरूपे अस्मिन् अन्वष्टकाश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्रे अस्मत्पितामहि अमुकिदेवि रुद्रस्वरूपे अस्मिन् अन्वष्टकाश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्रे अस्मत्प्रपितामहि अमुकिदेवि आदित्यस्वरूपे अस्मिन् अन्वष्टकाश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्र अस्मन्मातामह अमुकशर्मन् वसुस्वरूप अस्मिन् अन्वष्टकाश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्र अस्मत्प्रमातामह अमुकशर्मन् रुद्रस्वरूप अस्मिन् अन्वष्टकाश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्र अस्मद्वृद्धप्रमातामह अमुकशर्मन् आदित्यस्वरूप अस्मिन् अन्वष्टकाश्राद्धे पिण्डे प्रत्यवनेनिक्ष्व । किञ्चिन्नीवीविस्रंसनम् नमोव० इति षडञ्जलिकरणं ॐ नमोवः पितरो

रसाय नमोवः पितरः शोषाय नमोवः पितरो जीवाय नमोवः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमोवः पितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वः पितरो देष्मै तद्वः पितरो वासआधत्त इति । सूत्रदानम्—एतद्वः पितरो वासः । ऊर्जकरणं कर्मपात्रोदकेन ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् । स्वधास्थ तर्पयत मे पितॄन् । सव्येन देवताभ्यः० इति त्रिर्जपः अपसव्येन पिण्डार्चा पिण्डार्चनविधौ अत्रं नमः गन्धोऽस्तु-स्वधा अक्षताः पुष्पाणि तुलसीदलानि पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अत्रन्नपितरोमीमदन्तपितरो तीतृपन्तपितरः पितरः शुन्धध्वम् । वस्त्रं धूपं दीपं नैवेद्यं ताम्बूलं भूषणं च समर्प्य अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यामन्वष्टकायां तिथौ अमुकगोत्राः अस्मत्पितृपितामहप्रपितामहाः अमुकामुकशर्माणः वसुरुद्रादित्यस्वरूपाः तथा अमुकगोत्राः अस्मन्मातृपितामहीप्रपितामह्यः अमुकामुकदेव्यः वसुरुद्रादित्यस्वरूपाः तथा अमुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः सपत्नीकाः वसुरुद्रादित्यस्वरूपाः पिण्डार्चनविधौ इमानि गन्धाक्षतपुष्पतुलसीदलवासोधूपदीपनैवेद्यताम्बूलभूषणानि मद्दत्तानि यथाविभागं वः स्वधा । पिण्डार्चनविधेः सर्वं परिपूर्णमस्तु अस्तु परिपूर्णम् । सव्येन पिण्डाग्रभूमौ सुप्रोक्षितमस्तु अस्तु सुप्रोक्षितम् । शिवा आपः सन्तु विप्रकरे—

अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् ।
ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ॥

सौमनस्यमस्तु अस्तु सौमनस्यम् ।

लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ।
लक्ष्मीर्वसते सदा गोष्ठे सौमनस्यं सदास्तु मे ॥
अक्षताश्च अरिष्टं घ्नन्तु ।
अक्षतं चास्तु मे नित्यं शान्तिपुष्टिकरं परम् ।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥

ततः कुशैः कर्मपात्रोदकेन मूर्ध्नि अभिषेकं कुर्यात्। मम कुले दीर्घमायुरस्तु अस्तु। शान्तिः अस्तु अस्तु पुष्टिः अस्तु अस्तु वृद्धिः अस्तु अस्तु यत् श्रेयः तदस्तु अस्तु। यत् पापं रोगः शोको दुःखं दारिद्र्यं तत्प्रतिहतमस्तु अमृताभिषेकोऽस्तु। ततः अक्षय्योदकदानम् अक्षय्यं तु विप्रकर एव अपसव्येन अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणो वसुस्वरूपस्य अस्मिन् अन्वष्टकाश्राद्धे इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम्। अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्रस्य अस्मत् पितामहस्य अमुकशर्मणो रुद्रस्वरूपस्य अस्मिन् अन्वष्टकाश्राद्धे इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम्। अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्रस्य अस्मत्प्रपितामहस्य अमुकशर्मणः आदित्यस्वरूपस्य अस्मिन् अन्वष्टकाश्राद्धे इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम्। अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्रायाः अस्मन्मातुः अमुकीदेव्याः वसुस्वरूपायाः अस्मिन् अन्वष्टकाश्राद्धे इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम्। अद्येह०

शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्रायाः अस्मत्पितामह्याः अमुकीदेव्याः रुद्रस्वरूपायाः अस्मिन् अन्वष्टकाश्राद्धे इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम् । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्रायाः अस्मत्प्रपितामह्याः अमुकीदेव्याः आदित्यस्वरूपायाः अस्मिन् अन्वष्टकाश्राद्धे इदमन्नोदकादिकं तदक्षय्यमस्तु अस्तु अक्षय्यम् । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां तिथौ अमुकगोत्रस्य अस्मन्मातामहस्य अमुकशर्मणः सपत्नीकस्य वसुस्वरूपस्य अस्मिन् अन्वष्टकाश्राद्धेइदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम् । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्याँगते सवितरि नवम्यां तिथौ अमुकगोत्रस्य अस्मत्प्रमातामहस्य अमुकशर्मणः सपत्नीकस्य रुद्रस्वरूपस्य अस्मिन् अन्वष्टकाश्राद्धे इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम् । अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रस्य अस्मद्वृद्धप्रमातामहस्य अमुकशर्मणः सपत्नीकस्य आदित्यस्वरूपस्य अस्मिन् अन्वष्टकाश्राद्धे इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु अस्तु अक्षय्यम्। सव्येन प्रार्थना, आशीर्ग्रहणम्—अघोराः पितरः सन्तु सन्तु। गोत्रन्नो वर्द्धताम् वर्द्धताम् । दातारो नोभिवर्द्धन्ताम् वर्द्धन्ताम्। वेदाः वर्द्धन्ताम् वर्द्धन्ताम्। सन्ततिः वर्द्धताम् वर्द्धताम्। श्रद्धा च नो मा व्यगमन्मागाः बहुदेयं च नोऽस्तु अस्तु । अन्नं च नो बहु भवेत् भवतु । अतिथींश्च लभेमहि लभध्वम् । याचितारश्च नः सन्तु सन्तु । मा च याचिष्मकंचन मा याचेथाः एता एव आशिषः सत्याः सन्तु सन्तु । इति आशिषं प्रतिगृह्य स्वधावाचनम् ।

भो ब्राह्मणाः युष्मदनुज्ञया स्वधां वाचयिष्ये, वाच्यताम्। अपसव्येन स्वधावाचनीय कुशान् पिण्डोपरि निधाय तिलमोटकं गृहीत्वा अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रेभ्योऽस्मत्पितृभ्यः अमुकशर्मभ्यः वसुस्वरूपेभ्यः अस्मिन् अन्वष्टकाश्राद्धे ब्राह्मणा मधु मधु स्वधोच्यतामस्तु स्वधा। अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रेभ्यः अस्मत्पितामहेभ्यः अमुकशर्मभ्यः रुद्रस्वरूपेभ्यः अस्मिन् अन्वष्टकाश्राद्धे ब्राह्मणा मधु मधु स्वधोच्यताम् अस्तु स्वधा। अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रेभ्यः अस्मत्प्रपितामहेभ्यः अमुकशर्मभ्यः आदित्यस्वरूपेभ्य; अस्मिन् अन्वष्टकाश्राद्धे ब्राह्मणा मधु मधु स्वधोच्यताम्, अस्तु स्वधा। अद्येह शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्राभ्योऽस्मन्मातृभ्योऽमुकीदेवीभ्यः वसुस्वरूपाभ्यः अस्मिन् अन्वष्टकाश्राद्धे भो ब्राह्मणाः मधु मधु स्वधोच्यताम्, अस्तु स्वधा। अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्राभ्यः अस्मत्पितामहीभ्यः अमुकीदेवीभ्यः रुद्रस्वरूपाभ्यः अस्मिन् अन्वष्टकाश्राद्धे ब्राह्मणा मधु मधु स्वधोच्यताम्, अस्तु स्वधा। अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्राभ्यः अस्मत्प्रपितामहीभ्यः अमुकीदेवीभ्यः आदित्यस्वरूपाभ्यः अस्मिन् अन्वष्टकाश्राद्धे भो ब्राह्मणा मधु मधु स्वधोच्यताम्, अस्तु स्वधा। अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यां तिथौ अमुकगोत्रेभ्यः अस्मन्मातामहेभ्यः अमुक-

शर्मभ्यः सपत्नीकेभ्यः अस्मिन् अन्वष्टकाश्राद्धे ब्राह्मणा मधु मधु स्वधोच्यताम्, अस्तु स्वधा। अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यामन्वष्टकायां तिथौ अमुकगोत्रेभ्यः अस्मत्प्रमातामहेभ्यः अमुकशर्मभ्यः सपत्नीकेभ्यः रुद्रस्वरूपेभ्यः अस्मिन् अन्वष्टकाश्राद्धे ब्राह्मणाः मधु मधु स्वधोच्यताम्, अस्तु स्वधा। अद्येह० शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि नवम्यामन्वष्टकायां तिथौ अमुकगोत्रेभ्यः अस्मद्वृद्धप्रमातामहेभ्यः अमुकशर्मभ्यः सपत्नीकेभ्यः आदित्यस्वरूपेभ्यः अस्मिन् अन्वष्टकाश्राद्धे ब्राह्मणा मधु मधु स्वधोच्यताम्, अस्तु स्वधा। स्वधावाचनेष्वपो-निषिञ्चति दुग्धेन ऊर्जकरणं ॐ ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् स्वधास्थ तर्पयत मे पितॄन्। केचिन्मते नीराजनं सव्येन पितृभ्यः स्वधायिभ्यः० इति अपसव्येन पितरः स्वर्गं लोके प्रस्थिता भवन्तु।

उत्तानं पात्रं कृत्वा सव्येन दक्षिणासङ्कल्पः अद्येह० दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्रोत्पन्नः अमुकराशिः अमुकशर्माऽहम् अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाम् अमुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणाम् अस्मन्मातृपितामहीप्रपितामहीनाम् अमुकामुकीदेवीनां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणाम् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम् अमुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणाम् अक्षय्यतृप्तिप्राप्त्यर्थं पुरूरवोमाद्रवसंज्ञकविश्वेदेवपूर्वकं कृतस्यास्य महालयापरपक्षान्तर्गतान्वष्टकाश्राद्धकर्मणः साद्गुण्यार्थमिदं रजतं सोमदैवतं रजतनिष्क्रयिणीं दक्षिणां वा श्राद्धभोक्तृभ्यो ब्राह्मणेभ्योऽन्येभ्योऽपि दातुमुत्सृजे। ॐ तत्सन्न मम। पुनः सुवर्णं

सम्प्रोक्ष्य हिरण्यगर्भेति सम्पूज्य यवकुशजलान्यादाय अद्येह० दक्षिणायने शरदृतौ आश्विनमासे महालयापरपक्षे कन्यांगते सवितरि अन्वष्टकायां नवम्यां तिथौ अमुकगोत्रास्मत्पित्रादित्रयश्राद्धसम्बन्धिनां तथा अमुकगोत्रास्मत्मात्रादित्रयश्राद्धसम्बन्धिनां तथा अमुगोत्रास्मत् मातामहादित्रयश्राद्धसम्बन्धिनां पुरूरवोमार्द्रवसंज्ञकानां विश्वेषां देवानां प्रीतये वैश्वदैविककर्मणः साद्‌गुण्यार्थमिदं सुवर्णम् अग्निदैवतं मनसोपदिष्टां सुवर्णनिष्क्रयिणीं दक्षिणां वा ब्राह्मणेभ्यो दातुमहमुत्सृजे ॐ तत्सन्न मम । स्वतिलकं

सत्यानुष्ठानसम्पन्नाः सर्वदा यज्ञबुद्धयः ।
पितृमातृपराश्चैव सन्त्वस्मत्कुलजाःनराः ॥

अक्षताः पान्तु सव्येन विशेषपूजनम् ।

आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।
प्रयच्छन्ति तथा राज्यं नृणां प्रीताः पितामहाः ॥
आयुः पुत्रान् यशः स्वर्गं कीर्तिं पुष्टिं बलं शिवम् ।
पशून् सुखं धनं धान्यं प्राप्नुयात् पितृपूजनात् ॥

स्वस्ति भवन्तो ब्रुवन्तु 'ॐ स्वस्ति' इति विप्रोक्तिः । विश्वेदेवाः प्रीयन्ताम् प्रीयन्तां वो विश्वेदेवाः इति प्रतिवचनम् । ततः अपसव्येन पितामहपिण्डमुत्थाप्य सव्येन आघ्राय अपसव्येन पात्रान्तरे निधाय पिण्डस्थाने शङ्खचक्रादिक लिखित्वा गन्धाक्षतपुष्पैः सम्पूजयेत् । पिण्डस्थाने अत्रं नमः सुगन्धम् अक्षताः पुष्पाणि सव्येन तत्र दीपं संस्थाप्य षटऋतून् पूजयेत् । ॐ वसन्ताय नमः ॐ ग्रीष्माय नमः ॐ वर्षाभ्यो नमः ॐ शरदे नमः ॐ हेमन्ताय नमः ॐ शिशिराय नमः ततो हस्तौ संहतौ कृत्वा —

यान्तु पितृगणाः सर्वे यस्मात्स्थानादुपागताः ।
सर्वे ते हृष्टमनसः सर्वान् कामान् ददन्तु मे ॥
ये लोका दानशीलानां ये लोकाः पुण्यकर्मणाम् ।
सम्पूर्णान् सर्वभोगैस्तु तान्व्रजध्वं सुपुष्कलान् ॥
इहास्माकं शिवं शान्तिः आयुः आरोग्यसम्पदः ।
वृद्धिःसन्तानवर्गस्य जायतामुत्तरोत्तरा ॥

दीपस्थाने दीपः अपसव्येन पिण्डस्थाने पिण्डः असंचरमभ्युक्ष्य ।

यः कश्चित्पितृरूपेण तिष्ठते परमेश्वरः ।
सोऽयं श्राद्धप्रदानेन तृप्तिं लभतु शाश्वतीम् ॥
गयायां पितृरूपेण स्वयमेको जनार्दनः ।
यं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ॥
शमीपत्रप्रमाणेन पिण्डं दद्यात् गयाशिरे ।
उद्धरेत् सप्तगोत्राणां कुलमेकोत्तरं शतम् ॥
पितुः शतगुणं पुण्यं सहस्रं मातुरुच्यते ।
भगिन्यां शतसाहस्रं सोदर्ये दत्तमक्षयम् ॥

सव्येन अद्यदिने अपरमपि आमं पक्वं हिरण्यमुदयास्तपर्यंतं यद्दास्ये तत्स्वर्गद्वारे अमृतीभूय वः स्वधा ॥

देवताभ्यः पितृभ्यश्च महायोगीभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

सप्तव्याधेति च पठित्वा मनसा च पितॄन्ध्यात्वा अपसव्येन अमुकगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानाम् अमुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणाम् अस्मन्मातृपितामहीप्रपितामहीनां वसुरुद्रादित्यस्वरूपाणां तथा अमुकगोत्राणामस्मन्मातामहप्रमाता-

महवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां महालयापरपक्षान्तर्गतान्वष्टकाश्राद्धं विसृजे । सव्यमिदमन्वष्टकाश्राद्धं मया विधिहीनं कालहीनं वाक्यहीनं श्रद्धाहीनं दक्षिणाहीनं यत्कृतं तत्सुकृतमस्तु । अस्तु । प्रमादाद्भयाल्लोभात् यन्न कृतं तत् श्रीभगवद्विष्णोः प्रसादात् तथा ब्राह्मणवचनात् सर्वं परिपूर्णमस्तु । अस्तु परिपूर्णम् । कुशेन विप्रस्पर्शः ॐ उत्तिष्ठेति पितृब्राह्मणपूर्वं ब्राह्मणान् उत्थापयेत् । ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे उपप्रयन्तु मरुतः सुदानवऽइन्द्रप्राशूर्भवाचसा इति ब्राह्मणानुत्थाप्य ॐ व्वाजे वाजेवत व्वाजिनो धनेषु विप्रा अमृताऽऋतज्ञाः अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः कर्मपात्रं गृहीत्वा ॐ आमाव्वाजस्य प्रसवो जगम्म्यादेम द्यावापृथिवी विश्वरूपे आमागन्ताम्पितरा मातरा चामा सोम अमृतत्वेन गम्यात् इति प्रदक्षिणीकृत्य कर्मपात्रं विप्रपादाग्रे निनीय त्रीन् समुद्रान् समसृजत् स्वर्गानपाम्पतिर्वृषभऽइष्टकानाम् पुरीषंव्वसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः । अपसव्येन विसृज्य पाणिना दीपं निर्वाप्य सव्येन आचम्य—

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ॐ अच्युताय नमः, अच्युताय नमः, अच्युताय नमः ।

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥

अद्य मे सफलं जन्म अद्य मे सफलं तपः ।
अद्य मे गोत्रजाः सर्वे याता वोऽनुग्रहाद्दिवम् ॥

पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः ।

तत्क्लेशमिहसंजातं विस्मृत्य क्षन्तुमर्हथ ॥
सूक्तस्तोत्रजपं त्यक्त्वा पिण्डाघ्राणं च दक्षिणाम् ।
आह्वानं स्वागतं चार्घं विना च परिवेषणम् ।
विसर्जनं सौमनस्यमाशिषं प्रार्थनां तथा ॥
पित्र्यमन्यत्प्रकर्तव्यं प्राचीनावीतिना सदा ।
दैवपूर्वमिदं श्राद्धं पितृपूर्वं विसर्जनम् ॥
सर्वं कर्मापसव्येन दक्षिणादानवर्जितम् ॥

इति अन्वष्टकानवदैवत्यश्राद्धम् ।

## १२ अथ पितृजापः ( पितृसूक्तम् )

हरिः ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः ॥ १ ॥ ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवᳫँरजः मधु- द्यौरस्तु नः पिता ॥ २ ॥ ॐ मधु मान्नोव्वनस्पतिर्म्मधुमाँ २॥ऽ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः ॥ ३ ॥

ॐ अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा अपहता असुरा रक्षाᳫँसि व्वेदिषदः ॥ ४ ॥ ये रूपाणि प्रतिमुञ्चमानाऽ- असुराऽसन्तः स्वधया चरन्ति । परा पुरो निपुरो ये भरन्त्यग्निष्टाँल्लो- कात्प्रणुदात्यस्मात् ॥ ५ ॥ अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् । अमीमदन्तपितरो यथा भागमावृषायिषत ॥ ६ ॥ ॐ नमो वः पित- रोरसाय नमो वः पितरः शोषाय नमोवः पितरो जीवाय नवो वः पितरः स्वधायै नमोवः पितरो घोराय नमोवः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वः पितरो देष्मै तद्वः पितरो व्वासऽआधत्त ॥ ७ ॥ ॐ आयत्त पितरो गर्भङ्कुमारम्पुष्कर-

स्रजम् यथेह पुरुषो सत् ॥ ८ ॥ ॐ ऊर्ज्जंव्वहन्तीरमृतङ्घृतं पयः कीलालं परिस्रुतम् स्वधास्थतर्प्पयत मे पितॄन् ॥ ९ ॥ ॐ कृणुष्वपाजः प्रसितिन्नपृथ्वीं याहि राजेवामवाँ२ इभेन ॥ तृष्ष्वीमनुप्रसितिन्द्रूणानोस्तासि व्विद्ध्यरक्षसस्तपिष्ठैः ॥ १० ॥ तवभ्रमास आशुयापतन्त्यनुस्पृशधृषताशोशुचानः तपूंष्यग्नेजुह्वा पतङ्गानसन्दितोव्विसृजव्विष्वगुल्काः ॥ ११ ॥ प्रतिस्पशोव्विसृजतूर्णितमोभवापायुर्व्विशोऽअस्याअदब्धः । यो नो दूरेऽअघशंसोयोऽअन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥ १२ ॥ ॐ उदग्ने तिष्ठप्रत्या तनुष्ष्वन्यमित्राँ२॥ ओषतात्तिग्महेते । यो नो अरातिंसमिधान चक्रे नीचा तन्धक्ष्यतसन्नशुष्कम् ॥ १३ ॥ ॐ ऊर्ध्वो भवप्रतिविद्ध्याद्ध्यस्मदाविष्कृणुष्वदैव्यन्यग्ने । अवस्थिरातनुहि यातु जूनाञ्जामिमजामिम्प्रमृणीहि शत्रून् । अग्नेष्ट्वा तेजसा सादयामि ॥ १४ ॥ ॐ सुगावन्तर्ब्बर्हिषदंसुवीरं यज्ञंहिन्वन्तिमहिषानमोभिः दधानाः सोमन्दिवि देवतासुमहेमेन्द्रँयजमानाः स्वर्क्काः ॥ १५ ॥ ॐ यस्तेरसः सम्भृतऽओषधीषु सोमस्यशुष्मः सुरषा सुतस्य तेनञ्जिन्वयजमानम्मदेन सरस्वतीमश्विनाविन्द्रमग्निम् ॥ १६ ॥ ॐ यमश्विनानमुचेरासुरादधिसरस्वत्यसुनोदिन्द्रियाय इमन्तंशुक्रम्मधुमन्तमिन्द्रंसोमंराजानमिह भक्षयामि ॥ १७ ॥ ॐ यदत्ररिप्रंरमिनः सुतस्य यदिन्दोअपिबच्छचीभिः । अहन्तदस्य मनसा शिवेन सोमंराजानमिह भक्षयामि ॥ १८ ॥ ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः ॥ अक्षन्नपितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम् ॥ १९ ॥ ॐ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपिता-

महा: पवित्रेण शतायुषा व्विश्वमायुर्व्व्यश्ववै ॥ २० ॥ ॐ अग्न आयूᳬंषि यवस आसुवोर्ज्जमिषञ्चनः आरे बाधस्वदुच्छुनाम् ॥ २१ ॥ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वाभूतानि जातवेदः पुनीहि माम् ॥ २२ ॥ ॐ पवित्रेण पुनीहि मा शक्क्रेण देवदीद्यत् अग्ने क्क्रत्वा क्क्रतूᳬंरनु ॥ २३ ॥ ॐ यत्ते पवित्रमर्चिष्व्यग्नेव्विततमन्तराब्रह्म तेन पुनातु मा ॥ २४ ॥ ॐ पवमानः सो अद्यनः पवित्रेण विचर्षणिः यप्रोता स पुनातुमां ॥ २५ ॥ ॐ उभाभ्यांन्देवसवितः पवित्रेण सवेन च मां पुनीहि व्विश्वतः ॥ २६ ॥ ॐ व्वैश्वदेवी पुनती देव्या गाद्यस्यामिमां वंहव्व्यस्तन्न्वी व्वीतपृष्ठ्वाः तयामदन्तः सधमादेषुव्वयᳬंस्यामपतयोरयीणाम् ॥ २७ ॥ ॐ ये समाना समनसो पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥ २८ ॥ ॐ ये समानाः समनसो जीवा जीवेषु मामकाः तेषाᳬं श्रीर्मयि कल्पतामस्मिँल्लोके शतᳬं समाः ॥ २९ ॥ ॐ द्वे सृतीअशृणवम्पितृणामहन्देवाना मुतमर्त्यानाम् ताभ्यामिदंव्विश्वमेजत्तसमेतिवदन्तरा पितरम्मातरञ्च ॥ ३० ॥ ॐ इदᳬं हविः प्रजनम्मे अस्तु । दशवीरᳬं सर्वगणᳬंस्वस्तये आत्मसनि प्रजासनि पशुसनि लोकसन्न्यभयसनि अग्निः प्रजां बहुलाम्मेकरोत्त्वन्नम्पयोरेतोऽअस्म्मासुधत्तः ॥ ३१ ॥ ॐ उदीरतामवरउत्परासऽउन्न मध्यमाः पितरः सोम्म्यासः असुंय्यईयुरवृकाऽऋतज्ञास्ते नोवन्तु पितरो हवेषु ॥ ३२ ॥ ॐ अँगीरसोनः पितरो नवग्वा अथर्व्वाणो भृगवः सोम्यासः तेषां व्वयᳬंसुमतौ यज्ञियानामपि भद्रेसोमनसे स्याम ॥ ३३ ॥ ॐ येनः पूर्वे पितरः सोम्म्यासो नूहिरेसोमपीथ वसिष्ठाः । तेभिर्यमः सᳬंरराणो हविᳬंष्युशन्नुशद्भिः प्रतिकामनन्तु ॥ ३४ ॥ ॐ

त्वꣳसोसप्रचिकितो मनीषात्वꣳरजिष्ठमनुनेषिपन्थाम् तव प्रणीती पितरोनऽइन्दो देवेषु रत्नमभजन्तधीराः ॥ ३५ ॥ ॐ त्वयाथिनः पितरः सोमपूर्व्वे कर्माणि चक्रुपवमानधीयाः धन्त्वन्नवातः परिधी २॥ रपोर्णुवीरेभिरश्वैर्म्मघवाभवानः ॥ ३६ ॥ ॐ त्वꣳसोमपितृभिः सँव्विदानोनुद्यावापृथिवी आततन्थ तस्मै त इन्दो हविषा व्विधेम व्वयꣳस्यामपतयोरयीणाम् ॥ ३७ ॥ ॐ बर्हिषदः पितरःऽऊत्त्यर्व्वागिमावो हव्व्य चक्रुमा जुषध्वम् त आगता वसाशत्तमे नादानः शंय्योरणो दधात ॥ ३८ ॥ ॐ आहम्पितॄन्तस्मुंविदत्रा २॥ऽअवित्सिनपातञ्च व्विक्क्रमणञ्चविष्णोः बर्हिषदा ये स्वधया सुतस्य भजन्तपि त्वस्त ऽइहागमिष्ठाः ॥ ३९ ॥ उपहूताः पितरः सोम्म्यासो बर्हिष्येषु निधिषु प्रियेषु । त आगमन्तुत ऽइहश्शुश्रमत्वधि ब्रुवन्तु तेवनत्वस्मान् ॥४०॥ ॐ आयन्तुनः पितरः सोम्म्यासो ग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तोधिव्ब्रुवन्तु ते वन्त्वस्मानः ॥ ४१ ॥ ॐ अग्निष्वात्ताः पितर ऽएह गच्छत मदः सदत सुप्प्रणीतयः । अत्ता हवीꣳषि प्प्रयतानि बर्हिष्यथा रयिꣳ सर्व्ववीरन्दधातन ॥ ४२ ॥ ॐये अग्निष्वात्ता ये अनग्निष्वात्तामद्ध्ये दिवः स्वधया मादयन्ते तेभ्यः स्वराडसुनीतिं तां तथा वशांतन्न्वङ्कल्पयाति ॥ ४३ ॥ ॐ अग्निष्वात्तानृतुमतो हवामहे नाराशꣳसे सोमपीथंय्यआशुः । तनोव्विप्रास्सुहवाभवन्तुव्वयंꣳस्यामपतयो रयीणाम् ॥ ४४ ॥ ॐ आवच्च्याजानुदक्षिणतो निषद्ये मॅँयज्ञमभि गृणीत व्विश्वे । माहिꣳमिष्टपितरकेनचिन्नोयध्व त्रागपुरुषता कराम ॥ ४५ ॥ आसीनासोअरुणीनामुपस्थेरयिन्यत्तदाशुषेमर्त्त्योयदुत्रे पितरः तस्यवस्वः प्प्रयच्छततइहोर्ज्जन्दधात ॥ ४६ ॥ ॐयमग्ने कव्यवाहनत्वञ्चिन्मन्यसेरयिम् । तन्नोगीर्भिः

श्श्रवाय्य न देवत्रा पनयायुजम् ।। ४७ ।। ॐ यो अग्निः कव्यवाहनः पितॄन्यक्षदृतावृधः प्रेदुहव्यानिव्वोचति देवेभ्यश्च पितृभ्यश्च आ ।। ४८ ।। ॐ त्वमग्नऽईडितः कव्यवाहनो वा इढव्यानि सुरभीणि कृत्वा प्रादाः पितृभ्यः स्वधयातेऽअक्षन्नद्धित्वन्देवप्रयता हवीᳬंषि ।। ४९ ।। ॐ ये चे हपितरो ये च ने हय्याँश्चव्विद्मयाँ२।।ऽउचनप्प्रविद्म । त्वंव्वेत्थयति तेजातवेदः स्वधाभिर्यज्ञᳬं सुकृतं जुषस्व ।।५०।। ॐ इदं पितृभ्यो नमो अस्त्वद्द्ये पूर्वासोय ऽउपरासऽईयुः । ये पार्थिवे रजस्यानिषत्ता ये वा नूनᳬं सुवृजनासुव्विक्षु ।। ५१ ।। ॐ अधा यथानः पितरः परासः प्रत्तना सोऽअग्न ऽऋतमाशुषारगाः । शुचीदयन्दीधितिं मुक्थशासः क्षामाभिदन्तो ऽअरुणीरपव्रत ।। ५२ ।। ॐ उशन्तस्त्वानिधीमह्युशन्तः समिधीमहि । उशन्नुशतआवहपितॄन्नहविषे अत्तवे ।। ५३ ।। इति पितृसूक्तं समाप्तम् ।।

## १३ अथ मन्त्रपाठः।

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे । उपप्प्रयन्तु मरुतः सुदानवऽइन्द्रप्प्राशूर्भवास च ।। १ ।। ॐ आमा व्वाजस्यप्प्रसवो जगम्म्यादेमेद्यावा पृथिवीव्विश्वरूपे । आमागन्ताम्पितरामातराचामा- सोमो अमृतत्वेन गम्यात् ।। २ ।। ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः । अक्षन्नपितरो मीमदन्तपितरो तीतृपन्तपितरः पितरः शुन्धध्वम् ।। ३ ।। ॐ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्प्रपितामहाः पवित्रेण शतायुषा व्विश्वमायुर्व्यश्नवै ।। ४ ।। ॐ इद ᳬंहविः प्प्रजननम्मे अस्तु दशवीर ᳬंसर्व-

गण ँ स्वस्तये। आत्मसनि प्रजासनि पशुसनि लोकसन्न्यभयसनि। अग्निः प्रजाम्बहुलाम्मे करोत्वन्नम्पयो रेतोऽस्मासु धत्त॥ ५॥ यदापिपेष मातरं पुत्रः प्रमुदितो धयन्। एतत्तदग्ने अनृणो भवाम्यहतौ पितरौ मया॥ ६॥ ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा पूषानः पातु दुरितादृता वृधोरक्षामाकिर्नोऽअघश ँ सईशत॥ ७॥ रुचन्नाधेहि ब्राह्मणेषु रुच ँ राजसु नस्कृधि। रुचं विश्वेषु शूद्रेषु मयिधेहि रुचा रुचम्॥ ८॥ ॐ आयुः प्रजाम् इति च पठित्वा पितॄणां प्रसादोऽस्तु गङ्गागयाश्राद्धफलमस्तु धनसन्तानवृद्धिरस्तु।

सूक्तस्तोत्रजपं त्यक्त्वा पिण्डाघ्राणं च दक्षिणाम्।
आह्वानं स्वागतं चार्घ्यं विना च परिवेषणम्।
विसर्जनं सौमनस्यमाशिषं प्रार्थनं तथा॥
विप्रप्रदक्षिणां चैव स्वस्तिवाचनकं विना।
पितॄनुद्दिश्य कर्त्तव्यं प्राचीनावीतिना सदा।
अक्षय्ये च स्वधायां च पिण्डे चैवावनेजने॥
पुनः प्रत्यवने चार्घ्ये तन्त्रता विनिवर्त्तते॥
विसर्गश्चोल्मुकश्चाग्नौकरणं पङ्क्तिवारणम्॥
करशुद्धिरपोशानं पितृपूर्वाणि षट् सदा।
अक्षय्योदकदानं तु अर्घ्यदानवदिष्यते॥
स्वधावाचनकं सर्वं पिण्डोपरि समापयेत्।
अक्षय्यासनयोः षष्ठी द्वितीयाऽऽवाहने तथा॥
अन्नदाने चतुर्थी स्यात् शेषाः सम्बुद्धयः स्मृताः।
आगते स्वस्तिवचने गोत्राशिषि प्रदक्षिणे।
अर्घ्ये च दक्षिणादाने षट्सु सव्यं विधीयते॥

श्राद्धारम्भेऽवसाने च पादशौचे तथाऽर्चने ।
विकिरे पिण्डदाने च षट्सु ह्याचमनं चरेत् ॥
अग्नौकरणमर्घ्यं चाऽऽवाहनं वाऽवनेजनम् ।
पिण्डश्राद्धे प्रकुर्वीत पिण्डहीने निवर्तते ॥
स्वधावाचनलोपोऽस्ति विकिरस्तु न लुप्यते ॥

## १४ अथ मासिकश्राद्धम् ।

श्राद्धदेशे गत्वा दीपं प्रज्वाल्य आचम्य
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
यं ब्रह्म वेदान्तविदो वदन्ति परे प्रधानं पुरुषं तथाऽन्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय ॥
अभीप्सीतार्थसिध्यर्थं पूज्यते त्रिदशैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥
इति पुष्पाञ्जलिं दत्त्वा ब्राह्मणं स्थापयित्वा
ॐकुशोसि कुशपुत्रोसि ब्रह्मणा निर्मितः पुरा ।
त्वय्यर्चिते सोर्चितोऽस्तु यस्याहं नाम कीर्तये ॥

इति पठित्वा अपसव्येन तिलैर्निमन्त्रणम्—अद्येहेत्यादि० अमुकगोत्रस्य अमुकशर्मणो वसुस्वरूपस्य प्रथमानुमासिकश्राद्धे भवान्मया निमन्त्रितः निमन्त्रितोऽस्मि इति प्रत्युक्तिः सव्येन—

अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥
सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ।
भवितव्यं भवद्भिर्नोऽद्यतने श्राद्धकर्मणि ॥

सव्येन आगतं वः सुस्वागतम् अपसव्येन एतद्वः पाद्यमस्तु ।

यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे ।
तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने ॥

इति जलं दत्वा पादपूजनं पादपूजायामत्रं नमः सुगन्धः अक्षताः पुष्पाणि पादार्घं सम्पाद्य अद्येहेत्यादि० अमुकगोत्र अस्मत्पितः अमुकशर्मन् वसुस्वरूप अद्यकर्तव्ये प्रथमानुमासिकश्राद्धे एष ते पादार्घोऽस्तु ततः सव्येन आचमनं ब्रह्मन् अत्रोपविश्यताम् । मेध्यासने उपवेशयेत् ततः स्ववामभागे चतुष्कोणमण्डलं शङ्खचक्रे लिखित्वा तत्र आसनमासने पात्रं पात्रे पवित्रं पवित्रेस्थो वैष्णव्यौ० शन्नोदेवीति जलम् । यवोऽसि यवयास्मद्वेषो यवयारातीः इति यवान् । तिलोसीति तिलान् गन्धपुष्पाक्षतादि तूष्णीं प्रणवेन वा निक्षिपेत् । कर्मपात्रसम्पत्तिरस्तु अस्तु सम्पत्तिः, तेन जलेन आत्मानं सम्प्रोक्ष्य मासिकश्राद्धसामग्रीं सम्प्रोक्ष्य प्राणानायम्य पुण्डरीकाक्षाय नमः ।

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥
देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

इति त्रिवारं पठित्वा अपसव्येन

सप्तव्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ ।
चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे ॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ।
प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥
श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ।
मनसा च पितॄन् ध्यात्वा मासश्राद्धं समारभे ॥

ततः अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणो वसुस्वरूपस्य क्षुत्पिपासोपशान्त्यर्थं प्रथमानुमासिकश्राद्धं समारभे। ततो नीवीबन्धनं सोमस्य नीविरसि विष्णोः शर्मासि शर्म यजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि इति। दिग्बन्धनम्।

अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम्।
तथा बर्हिषदः पान्तु याम्यां ये पितरस्तथा॥
प्रतीचीमाज्यपाः पान्तु उदीचीमपि सोमपाः।
अध ऊर्द्ध्वं च कोणेषु त्रिकोणेषु च सर्वतः॥
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे।
तिला रक्षन्तु दितिजाद् दर्भा रक्षन्तु राक्षसात्॥
पङ्क्तिं वै श्रोत्रियो रक्षेदतिथिः सर्वरक्षकः॥

ततः कर्मपात्राभिमंत्रणम् ॐ यद्देवादेवहेडनं देवासश्चकृमा व्वयम्। अग्निर्म्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः यदि दिवा यदि नक्तमेनाꣳसि च कृमा व्वयम् व्वायुर्म्मा तस्मादेनसो व्विश्वान् मुञ्चत्वꣳहसः। यदिजाग्रद्यदि स्वप्न एनाꣳसि चकृमा व्वयम् सूर्योमा तस्मादेनसो विश्वान् मुञ्चत्वꣳहसः। शूद्रादिदृष्टिदूषितपाकः पूतोऽस्तु। अथ प्रतिज्ञा अद्येहेत्यादि० अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणो वसुस्वरूपस्य अस्मिन् प्रथमानुमासिकश्राद्धे इदमासनमस्तु ॐ भूर्भुवः स्वः इदम् आसनम् आस्यताम् आसे अपसव्येन पूजनम् अत्रं नमः पितैतत्ते एवं गन्धाक्षतपुष्पधूपदीपादिभिः सम्पूज्य पितृभ्यः स्वधायिभ्यः स्वधा नमः इत्यादि मन्त्रमुच्चरेत्। मातृपक्षे मातरिदं ते इति ततः अर्चनम् अद्येहेत्यादि० अमुकगोत्र अस्मत्पितः अमुकशर्मन् वसुस्वरूप अस्मिन् प्रथमानुमासिकश्राद्धे अर्चनविधौ इमानि गन्धाक्षत-

पुष्पधूपदीपतुलसीदलवासांसि मदत्तानि ते स्वधा। सव्येन अर्चनविधेः सर्वं परिपूर्णमस्तु अस्तु परिपूर्णम्॥ अपसव्येन गन्धादिदानाचमनम्। सव्येन स्वयम् आचम्य भस्मना चतुष्कोणमण्डलं कुर्यात्।

यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति।
एवं मण्डलभस्माङ्कः सर्वभूतानि रक्षतु॥

पत्रावलिं संस्थाप्य प्रथमं विष्णवे निवेद्य सव्येन परिवेषणम् उत्तानाभ्यां कराभ्यां पात्रमालभ्य जपति पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि विष्णो कव्यꣳरक्ष तिलान् विकीर्य प्रादक्षिण्येन अपहता असुरा रक्षाꣳसि वेदिषदः अंगुष्ठग्रहणम्-इदं विष्णुरिति इदम् अन्नं सोदककुम्भम् इदम् आज्यम् इदं शाकादिकं यत्परिविष्टं यत्परिवेष्यमाणं सर्वं कव्यं तिलमोटकं गृहीत्वा अद्येह० अमुकगोत्राय अस्मत्पित्रे अमुकशर्मणे वसुस्वरूपाय अस्मिन् प्रथमानुमासिकश्राद्धे इदमन्नं सोदककुम्भं घृताद्युपस्करसहितं यत्परिविष्टं यत्परिवेष्यमाणं ब्राह्मणस्यातृप्तिपर्यन्तम् अमृतस्वरूपं ते स्वधा। ये चेह पितरो ये च नेह यांश्च विद्मयाँ २॥ उचन प्रविद्म त्वं वेत्थयति ते जातवेदः स्वधाभिर्यज्ञꣳसुकृतं जुषस्व। ब्राह्मणहस्ते अपोशानं दत्त्वा सव्येन प्रणवव्याहृतिपूर्वकगायत्रीं मध्विति मधुमतीम् ऋक्त्रयं च पठेत् यथासुखेन भुज्यध्वम्। भुञ्जमहि तृप्तिं ज्ञात्वा सर्वम् अन्नादि परिगृह्य तिलजलमोटकानि परिगृह्य विकिरदानं नैर्ऋत्यां दिशि कुशत्रयं भूमौ क्षिप्त्वा आसनम्—

असंस्कृतप्रमीतानां त्यागिनां कुलभागिनाम्।
उच्छिष्टभागधेयानां दर्भेषु विकिरासनम्॥

सजलतिलमोटकयुतम् अन्नं विकिरेत्।

अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु पराङ्गतिम् ॥
येषां न पचते माता येषां न पचते पिता ।
उच्छिष्टं ये च काङ्क्षन्ति तेभ्योऽन्नं दत्तमक्षयम् ॥

हस्तौ पादौ प्रक्षाल्य आचम्य श्राद्धदेशे गत्वा पुनराचम्य ब्राह्मण-हस्ते जलं सकृत् सकृत् अपो दत्त्वा गायत्रीं मधुमतीं मध्वितिच जप्त्वा भो ब्रह्मन् अस्मिन् पाकमध्ये यत्किञ्चित् रोचते तत्प्रतिगृह्यताम् । सुस्वदितं सुस्वादितं शेषान्नेन किं क्रियताम् इष्टैः सह भुज्यताम् । श्राद्धभूमौ सुप्रोक्षितमस्तु अस्तु सुप्रोक्षितम् शिवा आपः सन्तु सन्तु विप्रकरे

अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् ।
ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ॥

सौमनस्यमस्तु अस्तु सौमनस्यम् ।

लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ।
लक्ष्मीर्वसते सदा गोष्ठे सौमनस्यं सदाऽस्तु मे ॥

अक्षताश्च अरिष्टं घ्नन्तु ।

अक्षतं चास्तु मे नित्यं शान्तिपुष्टिकरं परम् ।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥

ततः कर्मपात्रोदकेन मूर्द्धाभिषेकः मम कुले दीर्घम् आयुः अस्तु अस्तु । शान्तिः अस्तु अस्तु, वृद्धिः अस्तु अस्तु, यच्छ्रेयः तदस्तु अस्तु, यत्पापं रोगः शोको दुःखं दारिद्र्य तत्प्रतिहतम् अस्तु, अमृताभिषेकोऽस्तु ततः अक्षय्यम् अपसव्येन अद्येह० अमुकगोत्रस्य अस्मत्पितुः अमुक-शर्मणो वसुस्वरूपस्य अस्मिन् प्रथमानुमासिकश्राद्धे इदमन्नोदकादिकं यद्दत्तं तदक्षय्यमस्तु । अस्तु अक्षय्यम् । सव्येन प्रार्थना अघोराः पितरः सन्तु सन्तु । गोत्रन्नो वर्द्धतां वर्द्धताम्, दातारो नोभिवर्द्धन्तां वर्द्धन्तां वेदाः

वर्द्धन्ताम् २ सन्ततिः वर्द्धताम् २ श्रद्धा च नो माऽव्यगमत् मागाः, बहुदेयं च नोऽस्तु अस्तु, अन्नं च नो बहुभवेत् भवतु, अतिथींश्च लभेमहि लभध्वम् , याचितारश्च नः सन्तु, मास्मयाचिष्म कंचन मायाचेध्वम् । एता एव आशिषः सत्याः सन्तु आशिषः प्रतिगृह्य सव्येन दक्षिणासङ्कल्पः अद्येह० अमुकगोत्रस्य अमुकशर्मणो वसुस्वरूपस्य क्षुत्पिपासानिवृत्त्यै अक्षयतृप्तिकामनया कृतस्य सोदककुम्भप्रथमानुमासिकश्राद्धकर्मणः साङ्गतासिद्ध्यर्थम् इदं रजतं चन्द्रदैवतं ब्राह्मणाय दास्ये ॐ तत्सन्न मम । स्वतिलकम् ।

सत्यानुष्ठानसम्पन्नाः सर्वदा यज्ञबुद्धयः ।
पितृमातृपराश्चैव सन्त्वस्मत्कुलजा नराः ॥

विशेषपूजनं सव्येन।

आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।
प्रयच्छन्ति तथा राज्यं नृणां प्रीताः पितामहाः ॥
आयुः पुत्रान् यशः स्वर्गं कीर्तिं पुष्टिं बलं श्रियम् ।
पशून् सुखं धनं धान्यं प्राप्नुयां पितृपूजनात् ॥

अपसव्येन असंचरमभ्युदय

यः कश्चित् पितृरूपेण तिष्ठते परमेश्वरः ।
सोऽयं श्राद्धप्रदानेन तृप्तिं यास्यति शाश्वतीम् ॥
गयायां पितृरूपेण स्वयमेको जनार्दनः ।
यं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ॥
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
यत्र यत्र स्मरिष्यामि पितॄणां दत्तमक्षयम् ॥
शमीपत्रप्रमाणेन पिण्डं दद्याद्गयाशिरे ।
उद्धरेत्सप्तगोत्राणां कुलमेकोत्तरं शतम् ॥

पितुः शतगुणं पुण्यं सहस्रं मातुरुच्यते ।
भगिन्यां शतसाहस्रं सोदर्ये दत्तमक्षयम् ॥

सव्येन अद्यदिने अपरमपि आमं पक्वं हिरण्यम् उदयास्तमयपर्यन्तं यद्दत्तं यद्दास्ये तत्स्वर्गद्वारे अमृतीभूय ते स्वधा। देवताभ्यइति त्रिर्जपः अपसव्येन सप्तव्याधेति पठित्वा ततः अमुकगोत्रस्य अस्मत्पितुः अमुकशर्मणो वसुस्वरूपस्य क्षुत्पिपासोपशान्त्यर्थं प्रथमानुमासिकश्राद्धं विसृजे। इदं प्रथमानुमासिकश्राद्धं देशहीनं कालहीनं दक्षिणाहीनं यत्कृतं तत्सुकृतमस्तु यन्नकृतं तत् श्रीविष्णोः प्रसादात् तथा ब्राह्मणवचनात् सर्वं परिपूर्णमस्तु अस्तु परिपूर्णम्। अभिरम्यताम् इति विसृज्य उत्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वे महे उपप्रयन्तु मरुतः सुदानवऽइन्द्रप्राशूर्भवास च। ॐ आमाव्वाजस्यप्रसवोजगम्यादेमेद्यावापृथिवी विश्वरूपे आमागन्तां पितरा मातरा चामा सोमो अमृतत्वेन गम्यात् इति प्रदक्षिणीकृत्य नीवीं विसृज्य दीपं निर्वाप्य सव्येन आचम्य—

अद्य मे सफलं जन्म अद्य मे सफलं तपः ।
अद्य मे वंशजाः सर्वे याता वोऽनुग्रहाद्दिवम् ॥
पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः ।
तत्क्लेशमिह संजातं विस्मृत्य क्षन्तुमर्हथ ॥
यस्य स्मृत्या च नामोक्त्या श्राद्धयज्ञक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ॐ अच्युताय नमः ॥ ३ ॥

इति श्री जनार्दनजोशीनिर्मिता श्राद्धप्रयोगदीपिका समाप्ता।

॥ शुभं भूयात् ॥